बहोर्लोपो भूच बहोरिति कारलोपः। प्रकृतत्वं भूयादेशश्चा ईयसुनो निचादाद्युदात्तत्वं। उगित
श्चेति ङीप्। इति प्रथमस्य प्रथम एकविंशो वर्गः। ग। वत्सप्रियमनुवाक षट्सूक्तानि। तत्राग्निं ईडतमि
ति द्वादशर्चं सूक्तं प्रथमं। अग्निं ईडतमित्यादिकस्य द्वादशर्चस्य सूक्तस्य काण्व प्रस्कण्वो मेधातिथिरृषिः
अपवादाभावादनुवर्त्तमानं प्राग्हिरण्यस्तूपीयादित्युक्तं। गायत्रमेव छंदः। आग्नेयदेवताकत्वं विस्पष्टं ११२
अतएवानुक्रम्यात। अग्निं द्वादशमेधातिथिः काण्व आग्नेयमा ग्निनेति पादोतो ऽग्निदेवतोनिम

थ्याहवनीयश्चेति। विनियोगस्तु प्रातरनुवाके आग्नेये क्रतौ गायत्रे छंदसि अग्निं दूतमिति सूक्तं। आश्विने त
स्मात्रे र्विवासकाल इति खंडे अग्निमीळेऽग्निं दूतमिति। सूत्रितं। तथा पृष्ठ्यषडहस्य द्वितीयेऽहनि इद
मेव सूक्तमाज्यशस्त्रं। पृष्ठ्यस्याज्ये प्रावनोने अह्नी इति खंडे सूत्रितं। अग्निं दूतमिति द्वितीय इति
यष्टेतौ दर्शपूर्णमासयोः सामिधेनीषु अग्निं दूतमित्येका। नमः प्रवक्त्र इति खंडे सूत्रितं। ईळेन्या
नमस्यस्तिरोऽग्निं दूतं वृणीमह इति। अस्मिन्सूक्ते प्रथमामृचमाह॥ अग्निं दूतमिति। अत्र ग्ने ई त चामृत
मंत्रव्याख्यानं तैत्तिरीयब्राह्मणे समाम्नायते अग्निर्देवानां दूत आसीदुशना काव्योऽसुराणामि
ति। तादृशं देवदूतमग्निं अस्मिन्कर्मणि वृणीमहे। संभजामः। कीदृशं। होतारं। देवानामाह्वातारं।
विश्ववेदसं। सर्वधनोपेतं। अस्य प्रवर्त्तमानस्य यज्ञस्य निष्पादकत्वेन सुक्रतुं। शोभनकर्माणं। शोभ
नप्रज्ञं वा। मद्यमित्यादिषु अष्टाविंशतिसंख्याकेषु धननामसु वेदस इति शब्दः पठितः। होतारं। ह्वेञ्
स्पर्द्धायां शब्दे च। नाप्त्रीत्यादिसूत्रेण। बहुलं छंदसीति संप्रसारणं परपूर्वत्वे गुणः। नित्वादाद्यु
दात्तः। विश्ववेदसं। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। अस्य। ऊडिदमित्या
दिना विभक्तेरुदात्तत्वं। सुक्रतुं। क्रत्वादयश्चेत्याद्युदात्तत्वं॥ द्वितीयामृचमाह॥ अग्निमग्निं मि

मित्युत्तरस्याम्रेडितसंज्ञायां ५

113

यद्यपि अग्निः स्वरूपेण एक एव। तथापि प्रयोगभेदात् आहवनीयादिस्थानभेदात् पावकादि
विशेषणभेदाद्वा बहुविधत्वं। अग्निमग्निं प्रत्याग्निमग्निमिति वीप्सांता। हवीमभिः। आह्वानकरणैर्मंत्रैः
सदा हवंत। निरंतरम् अनुष्ठातारः आह्वयंति। कीदृशं। विश्पतिं। विशां प्रजानां होत्रादीनां पालकं। ह
व्यवाहं। यजमानसमर्पितस्य हविषो देवान् प्रतिवोढारं। अत एव पुरुप्रियं। बहूनां प्रीयास्पदं।
द्वि५ अग्निमग्निं। नित्यवीप्सयोरिति वीप्सायां द्विर्भावः। तस्य परमाम्रेडितसंज्ञायां अनुदात्तं वै। हवीमभिः। ह्वे त्यनुदात्तं ५
ञ् स्पर्धायां शब्दे च। आह्वानकरणभूते ष्वस्य व्यापारस्थानं व्याकृत्य च विवक्षायां अन्येभ्योपि दृश्यते इ
ति कर्तरि मनिन्। तस्य छांदसः ईडागमः। बहुलं छंदसीति ह्वयतेः संप्रसारणं। परपूर्वत्वं गुणावादेशौ
नित्वादाद्युदात्तत्वं। सदा। सर्वैकान्यकिंयत्तदः काले दा। इति सर्वशब्दाद्दाप्रत्ययः। सर्वस्य सोन्यतरस्यां दि इति निपा
तः। व्यत्ययेनाद्युदात्तत्वं। हवंत। ह्वो लङ्रूपं। तादृशः। टार-चाचाव छांदसः। शपि बहुलं
छंदसीति संप्रसारणं। तिङ् तिङः इति निघातः। विश्पतिं। पत्यावैश्वर्ये इति पूर्वपदप्रकृतिः स्वरः। प्राप्ते परादि
श्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। हव्यवाहं। वह प्रापणे। वहश्चेति ण्वि प्रत्ययः। सत्युत्तरप
दप्रकृतिः स्वरत्वं। पुरुप्रियं। समासांतोदात्तत्वं॥ [illegible]॥ अग्निं देवानिति। हे अ ११३

अग्ने जज्ञानः। अरण्योर्मथ्यमानः। उक्तौ। वृक्तबर्हिषे। आस्तरणार्थं छिन्नेन बर्हिषा युक्ताय तं यजमानमनुग्र
हीतुमिह कर्मणि हविर्भुजो देवानावह। नोऽस्मदर्थं होता देवानां आह्वाता चामीड्यः। स्तुत्योऽसि।
देवानित्यत्र संहितायां दीर्घादटि समानपाद इति रुत्वं। जज्ञानः। जनी प्रादुर्भावे। लिटः कानच्। गम
हनेत्युपधालोपः। द्विर्वचनेऽचीति तस्य स्थानिवद्भावात् द्विर्वचनं। विभाषोदात्तः। वृक्तबर्हिषे।
वृजी वर्जने। निष्ठेति क्तप्रत्ययः। यस्य विभाषेतीट्प्रतिषेधः। वृक्तं बर्हिर्यजमानायायनवान् विजा।
बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। असि। अस्ते सिप्। अदिप्रभृतिभ्यः शप इति शपो लुक्। तास
स्त्योर्लोपः। इति सकारलोपः। पादादित्वान्निघातः। होता। ह्वयतेस्तृन्। छीत्यादिषु च। बहुलं छन्दसी
ति संप्रसारणं। नित्वादाद्युदात्तः। ईड्यः। ईड स्तुतौ। ऋहलोर्ण्यत्। तित्स्वरिते प्राप्ते ईडवंदवृशंसदुहां ण्यत
इत्याद्युदात्तत्वं। ता [illegible] उशत इति। हे अग्ने यस्मात्कारणात्त्वं यासि देवानां
दूतकर्म प्राप्नोषि तस्मात्कारणात् उशतो हविः कामयमानान् तान् देवान् हविः स्वीकारार्थं विबोधय।
विबोधय बर्हिष्यस्मिन्कर्मणि तैर्देवैः सह आसत्सि आसीद आगत्योपविश। तान् दीर्घादटि समा
नपाद इति संहितायां रुत्वं। आतोटि नित्यमनुनासिकत्वं वा। उशतः। वश कान्तौ। लटः शतृ। अदिप्र
भृतिभ्यः शप इति शपो लुक्। ग्रहिज्यादिना संप्रसारणं। शतुरनुमो नद्यजादी इति विभक्ते

दाश्वांश्च। यासि। यह्वा नित्यमिति निघातप्रतिषेधः। हृतस्य भागः कर्मणि। हव्यं। हृतस्य भागकर्म
णीइति यत्। तस्य तित्स्वरितापवादत्वेन यतोनाव इति प्राप्तमाद्युदात्तत्वं सार्वविधयः छंदसि वि
कल्प्यंत इति निवर्त्तते। अतस्तित्स्वरितमित्येवं भवति। शेषनिघातः। ससि। सीदसि। षद्लृ विशरणगत्य
वसादनेषु। लटः सिपि शपा बहुलं छंदसीति लुक्। नलुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधस्तु प्राप्ने
न्यादिनाभीदादेशो न भवति। बर्हिषि। वृहु वृहि वृद्धौ। बृहेर्नलोपश्चेति इसिप्रत्ययः। प्रत्ययस्वारलइकार
उदात्तः। पंचमी भूयमादः। हृयूतानवनः ध्रुतेनेकूयमानदीदिवोदीप्यमानाग्नेश्चं रक्षस्विनारक्षो युक्तान
रिषितां हिंसकान्त्शत्रून्प्रति अस्माकं प्रतिकूलान्दहस्म। सर्वथा भस्मीकुरु। ध्रुतेनेड्कूयतेयस्मिन्नि
तिकरणाधिकरणयोश्चेत्यधिकरणे ल्युट्। अत्रेडु। स्तोतेरविवक्षितकर्मत्वेनाकर्मकत्वात्ध्रुतस्यकरण
त्वमेव। नतु कर्मत्वं। अतो नेषा तृतीया वाहाक्छंदसीति कर्मणि तृतीया। किंतु। कर्तृकरणयोस्तृतीयेति
करणवाचिन्येव। अतः कर्तृकर्मणे कृतावहुलमिति समासः। तत्र पूर्वपदप्रकृतिः स्वरापवादेति स्वार
प्रातिपदिकावस्थायामव्यक्तेसति। पश्चाद्विभक्त्युत्पत्त्यां यामिंत्रितस्यचेत्याद्युदात्तत्वं। दीदिवः। दी
व्यते लिटः। क्वसुः। तस्यवस्वेकाजाद्घसामितिनियमादिडभावः। द्विर्वचनं हलादिशेषः। उत्तरकारस्य
लोपाव्योर्वलीतिलोपः। क्वसः। किच्चाद्गुणाभावः। तुजादीनां दीर्घोभ्यासस्येतिदीर्घत्वमभ्यासस्य। सं ११४

बुद्धो । नृगिरिति वामिति नुम् । सांयोगान्तस्य लोपः इति सकारलोपेन कारस्य मञ्वासु रुः । संबु
द्धौ छंदसीति रुत्वं । विसर्गः । पदात्परस्यामंत्रितनिघातः । नञ्पूर्वामंत्रितस्याविद्यमानवत्पादादित्वे
न निघातोपपत्तिः । नचनामंत्रितसमानाधिकरणे सामान्यवचनवचप्रतिषेधः । अनयोरग्निपदविशे
षणत्वेन निघातोपपत्तिः । नचनामंत्रितसमानाधिकरणे सामान्यवचनप्रतिषेधः । अनयोरग्निपदवि
शेषणत्वेन विशेषवचनत्वाद् अत एव परस्परमनन्वयनात्सामर्थ्यासमर्थः । पदविधिरिति वा नियमा
त्सर्वस्य नपरांगवद्भावः । यत्तेकपाघन निघातस्याप्यनद एव दीडरं तदिति सरस्वतीयादौ पृथक्
पृथक् आ घ्रातव्यमिति उच्यात । अत्र दीदिवइति नाग्निपदस्याविशेषणं । किंतु । घृताहवनपदस्ये
वाघातनार्थी घृताहवन इति विवक्षितत्वात् । विशिष्टस्य तु पश्चादग्निविशेषणता । नत्र दीदिवः पदं प्रति
घृताहवनपदस्य विशेष्यत्वान्नामंत्रितसमानाधिकरणे इत्यविद्यमानवत्प्रतिषेधान्निघातोपपत्तिः ।
अत एव परस्परविशेषेण विशेष्यभावेन सामर्थ्यात् । सुबामंत्रितइति परांगवद्भावविशेषनिघातेना
पि स्वरोपपत्तिरिति । ईडेरन्त इत्यादौ तु भिन्नं परस्परान्वय इति विषम्यं । रिषतः । रुष रिष हिंसार्थाइ
ति जिवादिकस्य लटः शत्रादेशे शपि छांदसो गुणाभावः । तोदादिकस्य वा रुश रिश हिंसायामित्यस्य
छांदसं षत्वं । विकरणस्य शस्य ङित्त्वाद्गुणाभावः । इदय शब्दाद स्मायामधस्तजो तिनि रितिमचथ ।

सूत्रितं। अग्निनाग्निः समिध्यते वंच मेत्र आग्निनेति एषैवाग्निवत इत्यस्यानुवाका। अथाग्निय
इति खंडे ~~अन्न...~~ २

यविनिः। तस्य प्रच्ययाघ्कदात्तत्वं॥ ७॥ अग्निमंथने। अग्निनाग्निः समिध्यत इति एआनुवचनीया। भ्रात
र्विंशुदेवां प्रेषितः इति खंडे अथावग्नीं प्रणयत् इत्यकपक्रम्य सूत्रितं। यज्ञो वयं प्रमिनाम व्रतान्यग्नि
नाग्निः समिध्यत इति॥ ७॥ तामेतां षष्ठीमृचमाह॥ अग्निनाग्निरिति। अग्निराहवनीयाख्यः स्वामिन
प्रहित प्रमाणेनाग्निना निर्मथ्येन प्रणीतेन वा सह सं समिध्यते। सम्यक् दीप्यते। कीदृशो ग्निः। कविर्मे
धावी। गृहपतिर्यजमानः। गृहस्य पालको युवा नित्यतरुणः। हव्यवाट्। हविषां दाता। जुह्वास्यः
जुह्वा रूपेण मुखेन युक्तः। गृहपतिः। पत्यावैश्वर्ये इति पूर्वपदप्रकृतिः स्वरत्वं। युवा युमिश्रणे। क
निन्प्रवृषितक्षि राजि धान्विधुभ्यः तिदिव इति कनिन्। निर्वाह घकदात्तः। हव्यं वहतीति हव्यवाट्। वहश्चे
ति ण्विप्रत्ययः। णिचाउपधावृद्धिः। गतिकारकोपपदात्कृत् उत्तरपदप्रकृतिः स्वरत्वं। जुह्वास्यः। हूयते अन
पञु यति जुहूः। जुहोतेः स्रुवश्चेति क्विप्। तत्संनियोगा दीर्घश्च। स्रुवज्ञावाद्विर्भावश्चुवजह्वि प्रातिपदिकस्वरेणां
तोदात्तः। जुहूरास्यं यस्येति। बहुव्रीहौ पूर्वपदप्रकृतिः स्वरत्वेन स एव शिष्यते। शेषनिघातः। यणादे
शउदात्तस्वरितायायणः स्वरितोऽनुदात्तस्येत्याकारः स्वरितः॥ इति प्रथमस्य प्रथमे द्वाविंशो वर्गः॥
सूक्ते सप्तमीमृचमाह॥ कविमग्निमिति। हे स्तोतः सर्व अध्वरे क्रतौ अग्निमुपस्तुहि। उपेत्य स्तुतिं कुरु। ईदृ ११५
शं कविं। मेधाविनं। सत्यधर्माणं सत्यवदनरूपेण धर्मेणोपेतं। देवं द्योतमानं अमीवचातनं। अमीवानां

115

हिंसकानां शत्रूणां वा घातकं। सत्यं धर्मा यस्येति सत्यधर्मा धर्मादनिच् केवलादित्यनिच् समा
सांतः। अंतःपदेन तस्य समासस्याभिधानात्। बहुव्रीहौ पूर्वपदप्रकृतिःस्वरत्वे शेषनिघातेनानुदात्त
त्वं। अमीव शब्दो अमरोग इत्यस्मात् शावाजिकाम्रीवा अपामीवा इति वन्प्रत्यायईडागमेव निपातो नि
त्वादाद्युदात्तः। वतेव दयावानां वत्यस्मात् हिंसार्थात् लिजंतात् नंघादिवात् ल्फयोर नादेशः। लेरनिटी
तिणलोपः। लितीति धातोरकारस्योदात्तत्वं नबस्वारकर्तव्यात् णिलोपस्य स्थानिवद्भावः। नपदांतद्विव
वनेत्यादिना प्रतिषेधात्। अमीवानां चातन इति समासे उत्तरपदप्रकृतिःस्वारेण स एव शिष्यते।। ३।।
अष्टमी मृव माला।। यस्त्वामग्न इति। हे अग्ने। देवयो हविष्यति यजमानः देवहूतं त्वां सपर्यति परिचरति।
तस्य यजमानस्य प्राविता अवस्मा अवश्यंरक्षको भव। क्रूयत इति हविः। अर्चिशुचीत्यादिना इसिः।
प्रत्ययः स्वारेण इकार उदात्तः। हविषः पतिः हविष्यतिः। नित्यं समासे उत्तरपदस्थस्येति षत्वं। पत्या
वि श्वर्य इति पूर्वपदप्रकृतिःस्वरत्वं। सपरशब्दात् कंड्वादिभ्यो यगिति यक्। धातुप्रकरणात् गुणप्रति
षेधाद्यर्थो घकः। किंचा सपरशब्दस्य धातुत्वात् तद्विहितस्य यकः। आर्धधातुकत्वे सति अतो लोप इ
ति लोपः। सनाद्यंता धातव इति धातुसंज्ञायां तिप्रकरिशाप्। तास्मिन् सवर्णस्यातो गुण इति पररूपत्वं। यक
प्रत्ययस्वारेणो दात्तत्वं। शपा सह एकादेशस्य एकादेश उदात्तेनोदात्त इत्युदात्तत्वं। तिङ तिङ इति नि

घातो न भवति। यद्धन्नान्नि यमिति प्रति। षश्मनू॥ का। गा। ६। पद्याः हवनीययाः परस्पर संसर्गविदितस्य हवि
षो याज्या। यो अग्निं देववीतये हविष्मां आविवासति।
षो याज्या। यो अग्निं दववीतय इश्येषा। अथाग्नेय्य इष्टय इति खंडे सूत्रितं। यो अग्निं देववीताय कविस्तु
नाग विष्टाय इति। तामेतां याज्यां सूक्तगतां नवमीं मन्त्र माह॥ छ॥ यो अग्निमिति। हविष्मान् हवि र्दुक्तो
यजमानो देववीत। या देवानां हवि र्लक्षणं हेतुः। यागार्थं अग्निमाविवासति। अग्नेः समीपं विवाराधणं
परिचर्यां करोति। हे पावक अस्मैतस्मै मृडय। तं यजमानं सुखय॥ देववीताय। वीगति प्रजनन कांत्यशन
खादनेष्विति। अस्माद् शनार्थात् क्तिन्। देवानां वीतिर्यस्मिन् यस्मिन् यागे स देववीतिः। बहुव्रीहौ हविष
पदप्रकृतिः स्वरत्वं न विषयस्यानि संतस्येति पर्युदासाद्बहि॥ र्षा शान्तो दात्तः। मत्वपः। सर्वत्र दात्तत्वात्
स एव शिष्यते। आविवासति। वा गतिगंधनयोः। अस्मादेतस्मादेतर्थाद् गमयितुमिच्छतीति अर्थे सन्। आ
कानेच्छा परिचर्या यां पर्यवस्यतीति विवासति शब्दः। परिचर्यार्थे निपातो पतितः। द्विर्वचनं। अभ्यासस्य
ह्रस्वः। सन्यत इति इत्वं। अजिदित्यादि र्नियमितः। याघ कदात्तो। तिङ् तिङ् इति निघातो न भवति। यद्धृत्तान्नित्य
मिति प्रतिषेधतात्ति। ङिवौदात्तवती याः। डानि घातः। सहस्र। पच्यत्रसाहतिः। योगविभागाद् दाङ् सि
ञ्ज सहस्रमास समासौ तासां तस्य च धातोप रादि छंदसि बहुलमितित्तरपदो सौ दात्तत्वं। तास्मै क्रि
या ग्रहणं कर्तव्यमिति। संप्रदाने चतुर्थी॥ छ॥ पवमानेष्टा वाने हाविष्ये पावक स्यानुवाक्या। ११६

वसो रित्प्रतिषेधः। लोपो व्योर्वलीति वकारलोपः। संबुद्धौ अ[illegible] गिदचामित्यादिना नुम्। त
ङ्यादिलोपः। म३६

सनः पावकदीदिव इति पौर्णमासे नेष्टिः पश्चसोमाः। उपदिष्टा इति खंडे सूत्रितं। सनः पावकदीदि
वोऽग्ने पावक रोचिषेति। तामिताम नुवाक्यां सूक्तगतां दशमीमृचमाह॥१०॥ सनः पावकेति। हे दीदि
वो दीप्यमान पावक शोधकाग्ने स त्वं नोऽस्मदर्थं इह देवान् यक्षनादाश्च देवानावह। ततोऽस्मदीयं यज्ञं तत्र
त्योप विश्वं उपदेवसमीपं प्रापयेति शेषः। दीदिवः। दिवुः क्रीडादौ छंदसि लुङ्लङ्लिट इति वर्त्त
मानलिट्। क्वसुर्लिङ्गिर्णीवा हलादिशेषः। तुजादीनां दीर्घोऽभ्यासस्येत्यभ्यासस्य दीर्घत्वं। वस्वेकाजाद्घसा
मिति नियमात् वसो रित्तिरुत्वं विसर्गः। अग्ने पावक दिवात् न निघातः। देवाँ इत्यत्र दीर्घादटि समानपा
त्यम३ द इत्यत्र रुत्वं। आतोऽटि नित्यमित्याकारस्यानुनासिकः। भोभगोअघोअपूर्वस्येति रोर्यकारः। लोपः शाक
ल्यस्येति यकारलोपः। तस्यासिद्धत्वात् आद्गुणो न भवति। इह। इदमो ह इति सप्तम्यन्तात् हप्रत्ययः।
इदम इश्। तद्धितान्तत्वात् प्रातिपदिकत्वे सुपो धातुप्रातिपदिकयोरिति सप्तम्या लुक्। तद्धितश्चासु
र्वविभक्तिरित्यव्ययसंज्ञायां अव्ययादाप्सुप इत्युत्तरस्याः सप्तम्या लुक्। अकारः प्रत्ययस्वर
णोदात्तः॥११॥ एकादशीमृचमाह॥ सनस्तवान इति। हे अग्ने। नवीयसा। नवतरेण इदानीं क्रियमाणेन रयिं च
संपादितेन गायत्रेण गायत्रीछंदस्केन अनेन सूक्तेन स्तवानः। स्तूयमानः। स त्वं नोऽस्मदर्थं रयिं धनं

वीरवतीं शूरपुत्रपौत्रभृत्ययुक्तां इषमन्नं वयम् आ भरा संपादय। स्तवानः। ष्टुञ् स्तुतौ। धात्वादेः षः सः। स्व
रितञित इत्यात्मनेपदं। लटः। शानच्। कर्त्तरि शप्। बहुलं छंदसीति लुगभावः। गुणावादेशौ। आ
नेमुगिति मुग्न भवति। अनित्यमागमशासनमिति यागमानुशासनस्यानित्यत्वात्। शपः पित्वादनु
दात्तत्वं। शानचश्चित्वादंतोदात्तस्य। अदुपदेशाल्लपः परत्वात् सार्वधातुकानुदात्तत्वे। धातुः स्वर एव शि
ष्यते। नरा। हृयतेर्नृश्छंदसीति नत्वं। गायत्रेण। गायत्र्याः संबंधि गायत्रं तस्येदमित्यण्। प्रत्ययस्वरः।
नवीयसा। नवशब्दादतिशायने ईयसुन्प्रत्ययः। नित्वादाद्युदात्तः। वीरवतीं। मतुप् ङीप्। पः पित्वा
दनुदात्तत्वं। अकारः प्रातिपदिकस्वरेणोदात्तः॥१॥ द्वादशमीसूक्तमाह॥ अग्ने शुक्रेणेति। हे अ
ग्ने शुक्रेण शोचिषा दीप्त्या विश्वाभिर्देवहूतिभिः। यज्ञेहूत सर्वदेवताह्वानसाधन
स्तोत्रैः स्तुतस्त्वं नोस्मदीयमिमं स्तोमं स्तोत्रविशेषं जुषस्व। सेवस्व। विश्वशब्दो विशः कन्। तेनित्या
द्युदात्तः। देवहूतिभिः। देवशब्दः पचाद्यजंतः। चित्वादंतोदात्तः। देवानां हूतय आह्वानान्या
स्तु स्ताः हूतिषिति देवहूतयः। हूतयः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। स्तूयते आनेनेति स्तोमः। ११७
अर्ति स्तु सु इत्यादिना मन्। नित्वादाद्युदात्तः॥२॥ इति प्रथमस्य प्रथमे त्रयोविंशो वर्गः॥२३॥ स्त्र

समिद्ध इति चतुर्थेऽनुवाके द्वितीयं द्वादशर्चं सूक्तं। सुसमिद्ध इत्यादिकं द्वादशर्चं माप्रीसूक्तं। तस्य का
ण्वो मेधातिथिः ऋषिर्गायत्री छंदः। प्रयाजेषु प्रणीयमानाः। सुसमिद्धस्तनूनपादादिका द्वादश देवताः।
तथा चानुक्रमणिकायां। ऋक्संख्या ऋषिश्छंदश्चानुवृत्तिलाभसिद्धवत् ऋग्यदेवताः [illegible] सुसमि
द्ध इतीध्मः समिद्धो वा अग्निस्तनूनपान्नराशंस इलो बर्हिर्देवीर्द्वार उषासानक्ता दैव्यौ होतारौ प्रचे
तसौ तिस्रो देव्यः सरस्वतीलाभारत्यः त्वष्टा वनस्पतिः स्वाहाकृतय इति प्रयाजदेवता एतदाप्री
सूक्तमिति विनियोगस्तु। पाशोऽसु सुसमिद्धो न आ वहेति काण्वमाप्रीसूक्तं। एकादश प्रयाजा इति खंडे सू
त्रितं। समिद्धो अग्न इति सर्वेषां यथार्षि वेति। तस्मिन्सूक्ते प्रथमामृचमाह। सुसमिद्धो न इति। हे अग्ने
। सुसमिद्धनामक त्वं नोऽस्मदीयाय हविष्मते यजमानाय तदनुग्रहार्थं देवानावह हे पावक शो
धक होतः होमनिष्पादकाग्ने यक्षि च यज च। सुसमिद्धः। समः क्रियाविशेषणत्वेन गतिसंज्ञकत्वात्प्रा
दिसमासः। शोभनत्ववाचिनः सुशब्दस्य तु विशेषणं विशेष्येण बहुलमिति समिद्धपदेन कर्मधारयः
समासः। सुशब्दः प्रातिपदिकस्वरेणोदात्तः। कर्मधारये निष्ठेति पूर्वपदप्रकृतिस्वरत्वं। क्रियाविशेष
णत्वे हि सुशब्दस्य गतित्वात्प्रादिसमासे गतिरनंतर इति समो य [illegible] तत्र [illegible] तदेव [illegible] प्रकृतिः

ञ्तः पुनातीति पावक इत्यवयवप्रसिद्धिः स्वीकारे तु विशेषणत्वाद्धोतरिति वि
शेष्यं ७ च्चा
स्वरत्वेन स्वास्यतीति स्वशब्दोऽनुदात्तः स्यात् । तदैवाग्नेः सर्ववर्णस्यानुनासिकादविष्मात् । तदुविर स्या
स्तीति मतुप् । नासो मत्वर्थ इति मत्वेन पदद्वयस्य बाधित्वात् तत्रात्र कुर्वन् होतः पावकशब्दयोः रामंत्रि
तयोः पृथक्पृथगेव क्रियान्वयपरस्परमसामर्थ्यात् पराङ्गवद्भावाभावान्न तन्निबंधनमेकस्वर्यं ।
118 न वृद्धितीयस्यामंत्रितस्याष्टमिकनिघातानेकस्वर्यं । आमंत्रितं पूर्वमविद्यमानवत् । पूर्वस्याविद्य
चात्पादादि ५ मानत्वेन पदात्परत्वाद्यपरस्परसामानाधिकरण्येपि होतरित्यस्य विशेषणत्वेसमानमिवाविद्यमा
नत्वं । अतएवाविद्यमानवत्त्वासामर्थ्येपि न पराङ्गवद्भाव इति नैकस्वर्यसिद्धिः । अतो होतरितिवि
शेष्यात् तत्र सामान्यवचनमिति नामंत्रिते समानाधिकरणे इति । अविद्यमानवत्त्वप्रतिषेधात्प
दात्परत्वाद् पादादित्वाद् द्वितीयामंत्रितस्याष्टमिकनिघातेन वा पराङ्गवद्भावसतिशषनिघाते
न वा सर्वानुदात्तत्वसिद्धिः । यद्यपि यजा लोटः सिपि पिब कुलं छंदसीति शपो लुकु ग्रस्थादिना षत्वं
षठोः कसीनिकत्वं सदिरादेशः छांदसत्वात्र भवति । सिपः पित्वेनानुदात्तस्येत्वादात्तु स्वर
एवाशिष्यते । न च तिङ् तिङ इति निघातः । पूर्वस्य पावकेत्यामंत्रितस्याविद्यमानवत्त्वेन पदादपरत्वात् । ११८
अतएवतस्यैवस्य यजत्वेन होतरित्यापत्ति निघातः स्यादिति वेत्तान्यवृत्ति परापरत्वया होतरित्यस्यापि

पूर्वत्वेनाविद्यमानत्वात्। नञ्। नाममंत्रितसमानाधिकरणे इति नस्य निषिद्धमविद्यमानवत्त्वं। न तु पावकपद
स्याविद्यमानत्वेन समानाधिकरणपरत्वाभावः। यद्धि पदस्यैव दिकार्यं प्रतिपावकपदं तत्त्वादविद्य
मानवत्स्यात्। होतः पदकार्यमविद्यमानवच्च प्रतिषेधं प्रवृत्तिपरत्वाद्विद्यमानवदेव तिङन्तयेव।
होतरित्यस्याविद्यमानवत्त्वप्रतिषेधः। अतस्तस्याविद्यमानवत्त्वात् तदा पावकपदाय यद्यस्य निघातः प्राप्नोत्य
वा। सत्यं। अत्र यद्वृत्ताद्यस्यावशब्दपरत्वाद्यादिष्वावतिनिघातप्रतिषेधात् न विद्यतीति अदोषः। त्वा द्विती
यार्थं वमाहा। मधुमंतमिति। हे कवे मेधाविन् त्वं अथ नेतन्नूनपात् एतन्नामकस्त्वं अद्यास्मिन् दिने नोस्मद
मधुमंतं यं रसवंतं यज्ञं हविः। वीतये। भक्षणार्थं देवेषु कृणु हि कुरु। प्रापय इत्यर्थः। मधुमंतं। फलिपाटि
७ नमिमनिजना गुकपतिना किंचेति मन्यति। रुः प्रत्यये धकारः ध्वां तादृशः। निदित्यनुवृत्तिः प्र
त्ययस्य नित्या दाद्युदात्तो मधुशब्दः। तन्नूनपात्। आमंत्रितनिघातः। अद्य। सद्यः परुदित्यादिनाऽस्मि
२४ घ न्काले द्यप्रत्यये अद्येति प्रत्ययांतो निपातितः। प्रत्ययः स्वारणांतादात्तः। तद्धितश्चासर्वविभक्तिरित्यव्य
यत्वादव्ययत्वात् सुपः इत्युक्तपरिसप्तम्याः लुक्। संहितायामन्येषामपि दृश्यत इति दीर्घत्वं। कृणु हि
कृवि हिंसाकरणयोश्च इदितो नुम् धातोरिति नुम्। लोट्स्य हिरादेशः। धिन्विकृण्व्योर च इति श
प्यपवादो विकरणत्प्रत्ययः। तत्संनियोगेन वकारस्य अकारः। तस्यातो लोप इति लोपः। न

यवनमिति २

६

स्य स्था निकृष्टावाध्वर्युषूपधगुणो न भवति। ततश्च प्रत्ययादसंयोगपूर्वादिति ल्युकं न भवति। ततश्च
प्रत्ययाच्छंदो वा वचनात् तिङ् तिङ इति निघातः। वीतये। मंत्रहषेषपचमन विदभूवीराउदात्त इति नि
त्यतुदात्तः॥७॥ द्वितीयामृचमाह॥ नराशंसमिति। इह देवयजनादेशेऽस्मिन्प्रवर्त्तमानयज्ञे नराशंस
११९ मित नामकमग्निमुपहुये। आह्वयामि। कीदृशं। प्रियं। देवानां प्रीतिहेतुं। मधुजिह्वं। मधुरसा जिह्वा
पतं। माधुर्यरसास्वादकं जिह्वापतं वा। हविष्कृतं। हविषो निष्पादकं। नरशाब्दान्नर इत्यस्मादबंतः।
प्रत्ययस्य पित्वाद्याद्युदात्तः। स्वर एव शिष्यते। शंसन्त्यस्मिन्निति शंसः। हलश्चेत्यधिकरणे घञ्। नराशं
स इति समासे ऽनुत्तरपदप्रकृतिः स्वरत्वे प्राप्ते। ... दिगुणदत्तिवार्त्तरपदे प्रकृतिः ॥ रो ६
स्वरे भवतः। अत एव वचनस्याद्युदात्त्वा नरशब्दस्य दीर्घत्वं। इहा इदमो ह इति हप्रत्ययः। इदम इशीति नि
शादेशः। प्रत्ययस्वरः। प्रियं। प्रीणातीति प्रियः। इगुपधज्ञाप्रीकिरः क इति कः। प्रत्ययस्वरः। अस्मिन्नङि
दमिन्यादिना विभक्तेरुदात्तत्वं। ... निघातः। मधुशब्दस्य आद्युदात्तत्वमुक्तं। बहुव्रीहौ सर्वपदप्रकृतिः
स्वारण स एव शिष्यते। हविष्कृतं। हविः करोतीति हविः कृत्। क्विपि कृत्स्वरो ... कृ। नित्यं समासेऽनुत्तरपदस्य तिव स्य ३
त्वं। कृदुत्तरपदप्रकृतिः स्वरत्वं॥८॥ तृतीयामृचमाह॥ अग्ने सुखतम इति। इष्टशब्दानिधेयात् ह अग्ने इलितो
मानिः स्तुतः सन् सुखतमे अतिशायनसुखवाहनोऽकस्मिंश्चिद्रथादौ वा नस्था पयि वा कर्मसु मा वह इ ११९

वा१

स्य ३

ना

दृशश्चाविधयत्वमत्रस्तुवयित्वं ईडितः इति विशेषणं। मनुर्हितः। मनुनामंत्रेण मनुष्येण वा यज्ञमादि
रूपेणाहिता ऽत्रस्थापितस्त्वं होता। देवानां आकातासि। सुखतमः। सुखमस्मिन्नस्तीति मतुप्। तस्य
गुणवचनेभ्यो मतुपो लुक्। वक्तव्य इति लुक्। अतिशयेन सुखः सुखतमः। तमपोनुदात्तत्वात्प्रातिपदि
कस्वरः। रथः। रमु क्रीडायां। रमंते तस्मिन्निति रथः। हनिकुषिनीरमिकाशिभ्यः क्थन्। एकाचउप
देशेऽनुदात्तादितीट्प्रतिषेधः। अनुदात्तोपदेशेत्यादिना मकारलोपः। निपाताद्युदात्तत्वं। ईडितः। ई
डस्तुतौ निष्ठेति क्तः। इडागमः। तस्य आगमा अनुदात्ता इत्यनुदात्तः। प्रत्ययः स्वरः। देवानिति नकारस्य
संहितायां दीर्घादटि समानपादे इति रुत्वं। आतोटि नित्यमित्याकारस्यानुनासिकत्वं। नोचागाणे गो इत्या
दिना यत्वं। तस्य लोपः शाकल्यस्येति लोपः। तस्यासिद्धत्वात् गुणो न भवति। आनिपाताद्युदात्तः।
असि। असि भुवि लट्। सिप्। अदिप्रभृतिभ्यः शपः इति शपो लुक्। नासत्यो लोप इति सकारस्य लो
पः। होता। तिष्ठतीत्येन तृन्। सोऽऋदुशनस्पुरुदंस इत्यादिना अनङ्। ङिच्चान्तादेशः। अप्तृन्तृच् इत्यादिना उपधादीर्घः।
हल्ङ्याब्भ्यो इति लोपः। निपाताद्युदात्तः। मनुर्हितः। मन्यत इति मनुः। मन ज्ञाने। शृस्वृस्निहित्रप्यसिव
सिहनिक्लिदिबंधिमनिभ्यश्च उ प्रत्ययः। तत्र नित्यादिर्नित्यमित्याद्युदात्तः। हितं धातोर्निष्ठेति कर्म
णि क्तः। दधातेर्हिरिति हिरादेशः। मनुना हित इति समासः तृतीयायाः स्थाने सुपां सुलुगित्यादिना गु

दर्शनं भवति यद्वा मरणरहितस्य देवस्य बर्हिर्नामकस्य अग्नेः।

इत्यादेशः। तस्य रूढं। लुगभावः छांदसः। कृत्नीयाकर्मणीति तोः पूर्वपदप्रकृतिः स्वरत्वं॥ ८॥ पंचमीमृचमाह
स्तृणीत बर्हिरिति। हे मनीषिणो बुद्धिमंतः ऋत्विजः। बर्हिर्दर्भं स्तृणीत। वेदरूपयाच्छादयत। अत्रापि ब
र्हिर्नामकोऽग्निरुच्यते। कीदृशं बर्हिः। आस्तरणीयं। आनुषक्। अनुक्रमेण सक्तं परस्परं संबद्धं। घृत
पृष्ठं। घृतमेतन्नामस्कंवां बर्हिष्यासादितत्वात् घृतं पृष्ठे उपरिभागे यस्य बर्हिषः तत् घृतपृष्ठं। यत्र यस्मि
न् बर्हिषि अमृतस्यामृतसमानस्य घृतस्य वेस्तलो दर्शनं भवति। तद्बर्हिः स्तृणीतेति पूर्वत्रान्वयः। स्तृणीत।
स्तृञ् आच्छादने लोट् मध्यमपुरुषस्य बहुवचनं। लोटो लङ्वत्। तानस्तस्थामिपामिति तस्य तादेशः॥ क्र
यादिभ्यः श्ना। ई हल्यघोरितीत्वं। सवर्णाच्चेति व्यत्ययमिति णत्वं। प्वादीनां ह्रस्व इति श्नातो ह्रस्वत्वं। सतिशि
ष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः। अतिङ उपविश्य यः स्वारलोदात्तत्वं। बर्हिः बृंहेर्नलोपश्चेति इस्
प्रत्ययः स्वरः। आस्तरणीयं। आनुषक्। षंज संगे। धात्वादेः षः सः॥ घृ इति। घृ प्रा अनिदितामिति नकार
लोपः। आङ् चौ रूपसर्गयोः प्राक्प्रयोगः। गतिसमासः। उपसर्गात् सुनोतीत्यादिना षत्वं। घृतपृष्ठं घृ
त णदीप्त्योः। निष्ठेति क्तः। प्रत्ययस्वरलोदात्तः। घृतशब्दमेव पृष्ठमस्येति बहुव्रीहौ पूर्वपदप्रकृतिः
स्वरत्वं। मनीषिणः। आमंत्रितनिघातः। न विघात। मृतं मरणं यस्मिन्नित्यमृतं। बहुव्रीहौ पूर्वपदप्रकृ १२०
तिः स्वरत्वं बाधित्वा नञ् सुभ्यामित्युत्तरपदांतोदात्तत्वे प्राप्ते नञो जरमरमित्रमृता इत्युत्तरपदा
द्युदा

३.१ त्रि मा

घृताचीं। वहन्तं। वह्निरिति यस्या यां वा वि। वा गन्ति या। क्विवाची षष्ठुरिहागति स्थिते मा चं जहयति।
ल्फ इति ना विल्फट्। यो रना देशः। नस्याद्धेड कवर्ग इन्दिङः रव्या डि निरव्याङो देशप्राप्ते ग्रनसो
श्चेति प्रतिषेधः॥ ता षष्टी मृतमाह॥ विश्रयंतामिति। द्वारा यज्ञशालाद्वाराणि विश्रयंतां। कपाटोद्घाटन
सत्यस्य नवि विश्रियंतां। कीदृश्यः। ऋतावृधः। ऋतस्य यज्ञस्य वावर्द्धयित्र्यः। देवीः। द्योतमानाः। असश्चतः। असश्चे
त्यः। उद्घाटनेन प्रविष्ट पुरुषसंगरहिताः। यद्वा असश्चतः। प्रविष्टपुरुषरहिताभ्यन्तर प्रदेशा। तन्मुक्त
पुरुषप्रवेशाद्द्वाराणि मानितान्यः। एतत्संज्ञकाग्नि विशेषमन्त्रं त्या विश्रयंतां। विशेषेण सेवंतां।
तया द्वारसेवयात्र पुरुषप्रवास्तिनवा किं प्रविशन मिति। तदुच्यते। अद्यास्मिन्नहदिने नूनमवश्यं यज्ञाव
यज्ञं वकारादिनां तरिषपीति दृष्टव्यं। ऋतावृधः। ऋतंवर्द्धयंती यपित्वृधुरंतसाविततव्य थां क्विद्ये तिक्वि
पादुपपदसमासः। अन्येषामपि दृश्यत इति सर्वपदस्य दीर्घत्वं। वृधि वर्वर्द्धा त्रिस्य रणोदात्तः।
विभक्त्या सदेकादेशा उदात्तेनो दात्त इत्यन्तोदात्तः। असश्चतः। सस्जं च षस्तु गतौ। जकारस्य व्यत्ययेन
वकारः। लटः शत्रादेशः। द्वाराणामनवि द्यंते सेवंते ति सश्चतः। आगच्छंति तायस्तु प्रागवंशादिषु असश्चतः।
अद्यं। पुरुषप्रदियादिनां प्रत्ययांता निपातितः। ताद्धि नश्चासर्वविभक्ति रियत्यय संज्ञकत्वात्परस्य तान्२
विभक्तेर्लुक्। प्रत्ययस्वरः। तान्दात्तः। संहितायामन्येषामपि दृश्यत इति दीर्घत्वं। नूनं। एवमादी
सूत्रः २ × समासे त्वदुत्तरपदस्यत्रं तिरश्च त्वेनस्याव वाचोष्यते। देवीः। वा छंदसीति पू
र्वसवर्ण दीर्घत्वं। देवशब्दात्पिवाद्यन्तता दुयोगादाख्यायामिति ङीषा प्रत्ययस्वरेणा
दात्तः। ५

नामंतदृचं। तादृत्तर्चं। यजे स्तुमार्थ सप्तम्यादिना तिवन्प्रत्ययः॥ निघाद्यदाक्षदात्तः॥८॥ इतिप्रथमस्य
प्रथमवर्गविंशोवर्गः॥८॥ स्तोसप्तमीमृचमाह॥ नक्तोषासाइति। नक्तोषासादृत्तपंचशादृचलौकिकाल
विशेषवाचिनौ। इदत्तु तत्कालाभिमानिन्यौ देवते इह ग्रहीतव्ये। नक्तोषासा नक्तोषासौ निमित्तभूते
भूते। अस्मिन्नुप्रवर्त्तमाने यज्ञकर्मणि उपकाय। आकयामि॥ किमर्थं। नोअस्मदीयमिदं वेघामस्मि
संबर्हिर्दर्भ आसादा आसत्तुमाधृतुमाप्तुं। कीदृश्यौ। स्वपेशसा। शोभनरूपयुक्ते। नक्तं च उषाश्चनक्तो
षासा। प्रथमाद्विवचनस्य सुपांसुलुगित्याकारः। मलोपःउपधादीर्घश्छांदसो। देवताद्वंद्वेचेति उभयो
त्तरपदयोर्युगपत्प्रकृतिःस्वरत्वं। सुपेशसा। शोभनं पेशोरूपंययोस्ते उभयपदाकारः। पेशः शब्दोनु
विषयवात आद्युदात्तः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वस्याप्रवादेचेन आद्युदात्तत्वं
यत्वछंदसीत्युत्तरपदाद्युदात्तत्वं। अस्मिन् ङिदिमित्यादिना विभक्तिरुदात्ता। आसदे। षद्लृविशर
णगत्यवसादनेष्वधात्वादेःषःसः। आङ्पूर्वादस्मात्संपदादिभ्योभावेक्विप्। प्रादिसमासःकृदुत्तरप
दप्रकृतिःस्वरत्वं॥८॥ अष्टमीमृचमाह॥ तासुजिह्वाविति। ताशाब्दोत्रसर्वनाम्नःप्राप्तासिसिद्धार्थवाची॥
तोतो याज्ञिकानां प्रसिद्धौ वायवा उपह्वाय। आह्वयामि। नोऽस्मदीयमिमं यज्ञं यक्षतां। ताबुतोयज
तां। अनुतिष्ठतां। कीदृशौ। सुजिह्वा। शोभनजिह्वोपेतौ। प्रियवचनौ। शोभनज्वालोवेत्यर्थः। होता १२१

द्विवचने रुनोडी ति गुणः । अपृक्तित्युपधादीर्घः । पूर्ववदाकारः । निघाताद्युदात्तः । देव्या । देवानामिमो देवा
घ[illegible]गमावितियत् । ४

रा । होमनिष्पादकौ । दाव्यौ । देवसंबंधिनौ । अत एव । इमाव ग्नी देव्य होतृनामकौ । कवी । मेधाविनौ ।
तातौ द्वितीयाद्विवचनस्य सुपां सुलुगित्याकारः । एकादशानुदात्तं इत्युदात्तः । सुजिह्वौ । शोभनाजि
ह्वाययोस्तौ । नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं । पूर्ववदेकादशस्वरः । संहितायामादेशस्वरः । त
स्यलोपः । शाकल्यस्येतिलोपः । होतारा । जुहोतेस्तृन् । यस्येति चेत्यकारलोपः । त्रिनियादिर्नित्यमित्या
द्युदात्तः । पूर्ववदाकारः । यजतां । यजतां । लो टिशापि परतः सिब्बहुलं लेटीति । अकुलग्रहणात् सिप्
ऊर्ध्व वचर्षुण्यानि । ग्नानवमीमृवमाहः । इला सरस्वती तिस्रः महीशब्देमहत्वगुणयुक्तां भारतीमा
वाष्टा । अन्ये घाद्री स्तुते प्रसह दृशोध्रुः इला सरस्वती ही भारती त्याख्यातवा दिव्यादिशष्टानिाधयो वह्नि
मूर्तयस्तिस्रो । देवी दीप्यमाना बर्हिर्विघ्नां आस्तीर्ण सीदंतु । प्राध्रुवंतु । कीदृश्यः । मयोभुवः । सुखोत्पा
दकाः । अस्त्रिधः । शोषणहयणवारहिताः । इला । ईड स्तुतौ । ब्रांदसं रूपत्वं । घिक प्रत्यय ३ः स्वरः । तोषा
यंवापिदर्लंतानांयथावावादिशानि । शातिटाप् । सरस्वती । अस्तु नां तानि वादाद्युदात्तः । तस्या अस्ती
तिमतुप् । अट् उपधान्त्वाद्यर्वां तासोमर्थ इति नत्वेनपदत्वस्यबाधितत्वात्रुत्वाघभावः । उगितिदिश्चे गितव
तिङीप् । मतुपोङीपोपित्वादनुदात्तौ । मही । महती शब्दे तकारलोपः । छांदसः । यस्येति चेत्यकारलो

त्रिसन्ध्योऽस्मइति उदात्तः २

रवा २

पः। उदात्तनिवृत्तिस्वरेणङीप उदात्तत्वं। तिस्रः। त्रिशब्दाज्जसि। त्रिचतुरोस्त्रियांतिसृचतसृ इति तिसृ
देशः। अचिरऋतः इति रेफादेशः। देवी। देवानांपत्न्यो देव्यः। तुं योगाददा या मितिङीप्रत्ययस्येति वेत्य
कारलोपः। प्रत्ययःस्वरेणङीप उदात्तत्वं। जसि। दीर्घाज्जसिचेति निषिद्धं दीर्घत्वं। वाच्छंदसीति प
तुङागयात। मयोभुवः। मीञ्हिंसायां। हिनस्ति ङुः स्वमिति। सुखं यस्त्वकावयंतीति मयाभुवः। अंत
नावितत्पपर्यात्भुवः क्विप्। कृदुत्तरपदप्रकृतिः स्वरत्वं। बर्हिः। दृंहिर्निलापश्चे तिइसिप्रत्ययः। सीदं
षष्ठिविशेषणादेपाद्यादि नाम्नी दादेशः। स्त्रिघदिंसायस्य सुभीबासंपदादिभ्यो भावक्विप्। अनआव
ऊध्वीहिः। स्वपदप्रत्ततिः स्वरंबाधित्वान्तरसुम्या मित्यत्तरपदांतोदात्तत्वं। ७। पत्नीसंयाजचष्टुः पुरो
नुवाक्या। इहत्वष्टारमग्रियमिति शंयुर्वाकायसंप्रेषिन इतिरवं डसूत्रितं। सतपयांसि सप्तुपयंतियाज्या
इहत्वष्टारमग्रियमितिनामनां पुरोनुवाक्यां सूक्ते दशमीमृचमाह। ७। इह त्वष्टारमिति। त्वष्टारं
ष्टानामकमग्निं इह कर्मण्युपक्रये। कीदृशं। अग्रियं। श्रेष्ठं। विश्वरूपं। बहुविधरूपोपेतं। सोऽस्माकं
केवलोऽसाधारणोऽस्तु। इत्तरज्जयेमानेभ्यो ध्यधिकमनुग्रहं करोत्वित्यर्थः। त्वष्टारं। तेक्षेर्वेदसूत १२२
न्करणे। त्र्यपत्रैवरति स्तृति स्त्यतिध्वत्र्दिताववतीऽस्त्वावपदेस्का; संयोगाद्योरंतयेतिककारलो

रो बगोर्ध्वस्थ ७

पः। वंर्हिष्ठ इति। एकवचने रूतोऽडि सर्वनामस्थानयोरिति गुणे अनुनिर्यादिनात पश्च यादीषष्ठिटाना
निघादाघकदात्तत्वं। अग्नियं। अग्न्यादिय नुदात्तो घवछोर्मी वेति घवा। आप्र नौयीन्यादिनाघकारस्य
इयादेशः। यास्यति लोपः। आम्रनादिस्रपादेशिवद्भवनं स्वरसिद्ध्यर्थमिति। उपादेशाशिवद्भावाश्च
ययाघकदात्तत्वात् घवश्विचादीतादात्तत्वं। विश्वरूपं। विश्वानि रूपाणि यस्य चेनयस्य च षष्ठावेप स्व
सूनां स्निपुंनां रूपेस्त्वदितिश्रुतः। विश्वशब्दो घकदात्तत्वात्। पूर्वपदप्रकृतिः स्वरत्वे प्राप्ते बहुव्रीहौ विश्वं
संज्ञायामिति पूर्वपदान्तोदात्तत्वं। अस्माकं। अस्मदेपत्पो ङुष्यसिभ्यांदिकं। प्रत्ययः स्वादेशान्तोदात्तः
षष्ठीबहुवचनमाम्। अत्र परमपि युवावौ इति विवाधि वा प्रतिपदविधिवा शुभ्म साकं आकं आदेशेरुदात्तश्चेना नित्यत्वा
देश इति निषेधन युवावोऽवापिऽशोलोप इति दकारलोपं अकारान्तत्वेन पश्चात् शस्यापि सुटः सा
म इति निर्दिशे स्थानिन्यंत लौपिन निहत्तिं एवमर्थ प्रवाह सामइति सुडुक्तानि दिशा। केवलवृषादेशारुति
८। गणचाघकदात्तः।। एकादशी मृचमाह।। अव सृजेति। देवनस्यतो। एतन्ना मकाश्रेदेवहविर्दुश्योदेव
न्यो ऽस्मदीयं हविः। अवसृज। समर्पयेत्यर्थः। प्रदातुः। यं स्वयं यजमानस्य दानं परलोकविषयं वि
ज्ञानं वत्प्रसादादस्तु। वनस्पाते। आमंत्रित निघातः। षाष्ठिकमामंत्रित घाकदात्तत्वं। हविः। हसः प्र
देवापादादिवान्न निघातः

त्ययः स्वरः। दाञ्ः। ददातस्तृ॥ वितइत्यं ता दात्ता। ङसिरूतन्तदित्य, चं पर चंव। रात्स स्येति स लोपः॥
एकादशस्यारणो कारउदात्तः॥ वतनं। विती संज्ञाने। करणे ल्यट्। योनोर। देशः। लघूपधा गुणः॥ लि
तीति प्रत्ययात्पूर्वस्योदात्तत्वं॥ दादशी मूत्रमाह॥ स्वाहा यज्ञमिति। स्वाहा शब्दो हविः प्रदानवाची
सन्नुएतन्नाम कर्मणि विशोषं लक्षयति। तदाधि संपादितं यज्ञं इन्द्राय इंद्र उद्दिश्यं यज्ञनो यजमानस्य
५ तलोप्नन् है गृहे कि चिजः। कर्त्ता तत्र यत्नो देवा नुपकाय। लणो तना। हवि हिंसा करणयोश्च इदि चान्नुम॥ ला
भ ध्म बङ्कवचनस्य तस्ठस्ठमि पामितिता देशः। तस्तनस्तन थनाश्चेति न बादेशः। शापि प्राप्ते धिन्वि
कृण्व्योरच्च। उ प्रत्ययः। तस्संनियोगेन नकारस्य व अकारः। तस्यतो लोप इति लोपस्तस्य अवः परस्मि
न्निति स्ठानिवत्त्वाद्वाह्यकारस्य लघूपधगुणो न भवति। तनपः। पित्वेनाङिवाद्उकारस्य गुणः। इंद्रा
य रुजो दे त्यादिना रन्ननिपातो घञ दात्तः। यज्ञनः। यज देवपूजा संगतिकरणदानेषु। सुयुजोर्ङ्वनि
प्। ङसिन संज्ञायामाद्युदात्त पे प्राप्ते नसंयोगाद्घ मंतादिति निषेधः। वनिपः पित्वेन धातुः स्वरएव शिष्य
ते। गृहे। ग्रह उपादाने। गेहे क इति क प्रत्ययः। ग्रहिज्ये त्यादिना संप्रसारिता यांदीर्घादि टीति न कार स्य रुत्वं। १२३
आतो टि नित्यमित्याकारस्यानुना सिकादेशः। भोभगो इति यत्वं। तस्य लोपः। शाकल्यस्येति लोपः॥
संप्रसारणा परपूर्वत्वं प्रत्ययः स्वरः तत्र त्रनुलितीति प्रत्ययात्पूर्वस्योदात्तं। देवा उपत्वनर

123

इति प्रथमस्य प्रथमे पंचविंशो वर्गः ॥२५॥ एभिरग्न इति चतुर्थेनुवाके द्वादशर्चं तृतीयं सूक्तं । एभिर
ग्न इत्यादिकस्य द्वादशर्चस्य सूक्तस्य ऋषिछंदसी पूर्ववत् । आद्य सूक्तं बहुदेवताकं । अत एवानुक्रम्य
ते । एभिर्वैश्वदेवमिति । विनियोगो लूढः । द्वादशाहस्य प्रथमेहनि तृतीयसवने वैश्वदेवशस्त्रे ए
भिरग्ने दुवो गिर इति सूक्तं । तथा च सूत्रितं । अथ छंदोमाः । संतुदा इंमिरित्युपक्रम्य । एभिरग्ने दुवो
गिर इति वैश्वदेवं । तत्र प्रथमा मृच माह ॥ एभिरिति । हे अग्ने ॥ एभिरस्मिन्यागे संभावितैः विश्वेभि
र्देवैः सार्धं देवैः सह सोमपीतये । सोमपानोपेतयागार्थं दुवो अस्मदीयां परिचर्यां गिरः स्म
दीयाः स्तुतीश्च प्रति आयाहि । आगच्छ । यक्षि । आगत्य यज च । एभिः पूर्वनिर्दिष्टानां देवानां इदमा पराम
र्शाद् इदमोन्वादेशेशानुदात्तस्तृतीयादिविभक्त्यनुदात्तः । विभक्तिश्चास्य सर्वादेशः । नेदमदसोरकोरिति भिस ऐ
सादेशाभावः । विभक्तिरनुदात्तेति वा तवर्क । उडिदमित्यादिना विभक्तेरुदात्तत्वं । तन्नांतोदात्तादिति अ
धिकाराद् दुवः । नव्विषयस्यानिसंतस्येत्याद्युदात्तत्वं । विश्वेभिः । विश्वशब्दो विशिः क्वन्नंतो नित्वा
दाद्युदात्तः । बहुलं छंदसीति भिस ऐस न भवति । बहुलं च वानरुत्येदिये चं । सोमशब्दः अर्ति
स्तुसु इत्यादिना मन्नंतो नित्वादाद्युदात्तः । सोमस्य पीतिर्यस्मिन्यागे स सोमपीतिः । तस्मै तादर्थ्ये चतु
र्थी ।

यङो लौटः सिपु१

धा। देवन्निः। बहुलं छंदसीति भिस एसादेशाभावः। बहुवचनान्निरित्येदित्येवं। यद्दिबहुलं छंद
सीति शपो लुक्। व्रश्चादिना षत्वं। षढोः कस्सीति कत्वं। सर्द्धिरादशः। छांदसत्वान्न भवति। सिपः पित्वेना
नुदात्तत्वात् धातुः स्वर एव॥८॥ द्वितीयामृचमाह॥ आवा कण्वा इति। हे विप्रा मेधा विनः अग्ने कण्वा मेधा
विनः ऋत्विजः वाय यज्ञनिष्पादकं वां अश्रूषत आह्वयेति। तथा तेऽधियः यदीयानि कर्माणि गृणन्ति क
थयंति। ततो हे अग्ने देववीर्देवैः सह आगहि। आगच्छ। विप्रा इत्यादिषु वक्तव्यं। शानिसंख्याकेषु
मेधाविनामसु कण्व रभु रितिपठितं। वा। वामौ। द्वितीयायाः इति वादेशः। सर्वानुदात्तः। कण्वाः। कण शब्दा
र्थः। असिद्धूलटिकण्णीषिष्वियादिनाक्वन्। निच्चादाद्युदात्तः। अश्रूषत। क्रेन्द्रे स्पर्द्धायां शब्दे च। छंदसि लु
५३ ङ्लङ्लिटइति वर्त्तमाने लुङ्। ञिच्चादात्मनेपदं। ऋस्य आत्मनेपादष्वनतो इयदादेशः। क्सः सि त्वाएका
रइति वृद्धि प्रतिषेधः। बहुलं छंदसीति संप्रसारणं। परपूर्वत्वं। हलइति दीर्घत्वं। आदेश प्रत्यययो रिति
षत्वं छंदसचान्हकारस्य लगुणः। अडागमः। गृणंति। गृशब्दे लिट्। झि झोन्तः। क्र्यादिभ्यः श्ना। प्वादीनां
ह्रस्वइति धातोः ह्रस्वत्वं। श्नाभ्यस्तयोरात इत्याकारलोपः। लुवर्णाच्चेति वक्तव्यमिति णत्वं। तिङ्श्चैर १२४
एवशिष्यत। तिङः। आमंत्रितनिघातः॥ तत्र अनुदात्तामित्य उदात्तोत्तम यात्वकव वनस्पेति षष्ठ्याः।

तदृश्यादेशः।।दावित्ति।।छांदसो ऐमिङ्प्रभावः।गच्छ।गम्लृ सृप्लृ गतौ।लोट्।।सर्वपिब।कर्त्तरि शपात
स्य बहुलं छंदसीति लुक्।अनुदात्तोपदेशेत्यादिना मकारलोपः।तस्यासिद्धवदत्राभादिति सिद्धत्वा
त्तो हेरिति हेर्लुङ्न भवति।।छ।।तृतीयामृचमाह।।इंद्रवायू बृहस्पतिमिति।इंद्रादीन्देवान् मारुतं मरु
तां वा स्वनां संबंधिनं गणं च।।हे अग्ने यक्षीति पदद्वयमनुवर्त्तते।इंद्रश्च वायुश्च इंद्रवायू।देवताद्वंद्वे चेति
प्राप्तस्यानङः।उभयत्र वायोः प्रतिषेधो वक्तव्य इति प्रतिषेधः।।देवताद्वंद्वे चेति प्राप्तस्योभयपदप्रकृति
स्वरस्यानेनैव रपूर्वेऽनुदात्तादावितिनिषेधः।समासांतोदात्तत्वमेव।बृहस्पतिं बृहतः करपत्योश्चोरादे
वतायां रश्मिर्धोयाः सुट् तलोपश्च वक्तव्य इति तलोपः।सुडागमश्चात्र हृस्वात् इमा छंदांते।किंविंशसयंति
वा मनः पारत्राणं।पातीति पतिः।पातेर्डतिः प्रत्ययः स्वार लाघवदात्तः।समासत्वेनैव नस्पत्यादि स्वयुग
पदित्युभयपदप्रकृतिः स्वरश्च।मित्रा।।द्वितीयायाः सुपां सुलुगित्यादिना विभक्तेराजादेशः।।आदित्यान्
अदितेरपत्यानि त्यादित्याः।दित्यदित्यादित्यपत्युत्तरपदाण्यः प्रत्ययः स्वरः।।मारुतां मरुतां विकारः
अनुदात्तादेश्चेत्र।निचाद[illegible]दात्तः।।चतुर्थीमृचमाह।।प्रवो त्रियंतइति।।हे इंद्रादिदेवाः।वो युष्मदर्थ
इंदवः सोमाः प्रत्रियंतां।प्रकर्षेण संपाद्यंतां।कीदृशाः।मत्सराः।टमिकराः।मत्सरासोमामंदते स्तु

चु २

श्विंकमीलइतियास्कः। मादयिष्णवः। हर्षहेतवः। द्रप्साः। बिंदुरूपाः। मध्वः। मधुराः। वसूयुदः। वसूयुव
मसादिपात्रेष्ववस्थितास्ताः। प्रव्यवहिताश्चेति व्यवहितप्रयोगः। त्रियंता। नियोयकि रिङ्शीयङि लिति रि
ङादेशः। द्रुत्रोवा। सूर्यहोर्नः। छंदसीति हकारस्य नकारः। इंदवः। उंदी क्लेदने। उंदेतिपाचालीनि नि दि
यन्तुरन्तो। उंदरिच्चादेरिति उप्रत्ययः। आदेर्लिकारस्य। निपादाघ्रुदात्तत्वं। मत्सराः। मदतृप्तियोगे वि
दिन्यनुदृसोत्सधूमदिन्यः किदिति सरप्रत्ययः। तितुत्रतथसिसुसरकसेषु चेतीट्प्रतिषेधः। वि
चादंतोदात्तः। मदीहर्षग्लपनयोः। मादयंतासः। छंदसि लिङ्सुत्र। लेरनिटीति णिलोपः न्नासे श्रया
मंतात्स्याप्येष्विचियुमिति आयादेशः। विचादंतोदात्तः। मध्वः। मधुशब्दाद्घदात्तः। उक्तः। मधुशब्दस्य प्रथ
येन पुलिंगत्वं। संज्ञापूर्वको विधिरनित्यः। इतिजसि चेति गुणो न। नवति स्ववसूषदः। वसुकसुजमुक
मुत्रदाने। वस्पात नरूप तायप्तु बमासम्यातेभ्यः। रुषिवमीयादिनाबुः। तत्र सीदंतीति वसूसदः। सस्
दिषिप्यादिना क्विप्। सुषामादरानीति गणत्वात्षत्वं। रुडुत्तरपदप्रकृतिः स्वरत्वं॥ ७॥ पंचमी सृच माद
इलाते चामिति। हे अग्ने वां इलाता। ऋत्विजः स्तुवंति कीदृशाः। अवस्यवः। अवनं रक्षणं तदिच्छन्तः देवा
निच्छंतः। कण्वासो मेधाविनः। वृक्तबर्हिषः। आस्तरणार्थं छिन्नदर्भाः। हविष्मंतो हविर्युक्ताः। अरंकृ

तः। अलंकर्त्तारः। इळानाः ईड स्तुतौ। अनुदात्तेत्वाद्धातोरुशानच्। अदिप्रभृतिभ्यः शप इति शपो लुक्।
रुस्यो आदेशः। टारत्वं तास्यनुदात्तेदित्यादिना लसार्वधातुकस्यानुदात्तत्वाद्धातुः स्वरः शिष्यते।
अवस्यवः। अवं तीच्छवादवाः। नानतिशायानकं ते। सुप आत्मनः क्यच्। क्यचि चेति ईत्वं न भवति। न
छंदस्यपुत्रस्येति निषेधात्। सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्य इति सुक्। क्याच्छंदसीति उप्र
त्ययः। अतो लोपः। प्रत्ययस्वरो लो ताता तत्त्वं। कण्वासः। कण शब्दार्थः। कणं तिष्ठन्ति स्तोत्रादिपाठे
नेति कण्वाः। रुचिजः। अशिपूषी त्यादिना कन्। नित्यादादुदात्तः। आज्जसेरसुगिति असुक्। दू
रुवर्हिषः। वृक्तमुक्तं। बहुव्रीहौ पूर्वपदप्रकृतिः स्वरत्वं। हविष्मंतः। हविरेषामस्तीति हविष्मंतः।
तासोमचर्वीदि इति। नचेन अपवादत्वान्नरुत्वं। अरं कृतः। अलं ऊर्वीतीत्यलंकृतः। क्विप्चेति क्विप्राक्
स्वस्य तुक्। कपिलादीनां संज्ञाछंदसोर्वा लोरत्वमापद्यते। इति लकारस्यारफादेशः॥ ताष
छीमृवमाद॥ वृतपृष्ठेति। हेअग्ने वायो अश्वा रथिनवहंतीति। कीदृशाः। घृतपृष्ठाः। घृतं गच्छेनदी
घृतपृष्ठाः। मनोयुजः। मनः संकल्पमात्रेण रथे युज्यमानाः। वह्नयः। वोढारस्ते रश्मिः सोमपान
हेतुयागार्थं देवानावहेति शेषः। घृतपृष्ठाः। घृतं हेणदीप्त्योः। घृतं दीप्तं पृष्ठं येषां ते घृतपृष्ठाः।

पकारेण। चतुर्णां सिद्धत्वात्। न खवति त्रिवृत्तेनां नासिद्धत्वं। तत्र। सिद्ध स्यस्य स्पष्टं कारात। किंच प्रातिशाख्ये पित
कारस्य विहितः। तेषां बोऽके। रकारनकारयोस्तु। अरुः सकारोदयोस्तकारं भिक्षि।५

126 घृतशब्दः प्रत्ययस्वरेणान्तोदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिः स्वरत्वं। मनसा युंजन्त इति मनो युजः। रुधिरं
गिर्या हिनाद्धि पूर्णा। रुद्धुत्तरपदप्रकृतिः स्वरत्वं। चौ। आमो द्वितीयायाश्च्यनुदात्तस्त्वादशः। वहंति। शपति
पोरनुदात्तत्वाद्धातुस्वरः। यद्वृत्तयोगान्निघाताभावः। वङ्क्यः। निरिच्यन्तरात्तो। विहिभ्रिश्रुस्रुस्नाहाचरिभ्यो
निदिति निर्वियः। तस्य निच्चादाद्युदात्तत्वं। सोमपीताय। उक्तं। सकारपरतानकारस्य संहितायां निश्चे
तिडागमः। खवरि वति वर्त्ती। वयो द्वितीयांशरि। पोष्कर सादरिति। द्वितीयस्तकारः॥ इति प्रथमस्य प्रथमे
षड्विंशो वर्गः॥२६॥ स्रुके सप्तमी मृत्युमाह॥ तान्यजत्रानिति। हे अग्ने। तान् इंद्राणी नादवान् यजत्रान् य
जनीयान्। ऋतावृधः। सत्यस्य यज्ञस्य वा वर्द्धकान् पत्नीवतः। पत्नीयुक्तान्। रुधिरं सुजिह्व। शाल्मनेजि कुरु ५
ह्वा। पिव। मुह्यो मधुरस्य सोमस्य मार्गं देवान् पायय। यजत्रान्। अमिनक्षियजिवंधिपतिभ्योऽत्रन्नि
ति यजेरत्रन् प्रत्ययः। ऋतावृधः। वृधुवृधो। अन्तर्णीतण्यर्थानि क्विप्। प्रतिक्किप्। अन्येषामपि दृश्यत इति
पूर्वपदस्य दीर्घत्वं। पत्नीवतः। पत्न्या नयिज्ञसंयोग इति ङीप्। इकारस्य च नकारः। ताए षां संतीति मतु
प्। छंदसीरइति वत्वं। पतिशब्दो ऽतिप्रत्ययांतोऽचां दात्तः। ङी[redacted]। यारनुदात्तत्वाचा सए वशिष्यते। रुधिरं मो
ला टः। सिप्यसिर्लपिड्वृत्ति। बहुलं छंदसीति विकरणलुक्। श्रुशृणुपृकृवृभ्यः छंदसीति। रुधिरादशः। १२६
वृधेर्धातुस्वरः। समासे दुत्तरपदप्रकृतिस्वरत्वं। अग्ने। पादादि चान्नामंत्रितनिघातः। षाष्ठिकमा
घुदात्तत्वं। ३

त्रिवा कृत्वा भावः। मध्वस्तः। सुतिङ्क। आमंत्रितनिघातः। पायय। पापान। पिबंतं प्रयुंक्त इति। ल्लमति
ब्वितिलिट्। शाछासाह्वाव्यावेपां युगिति युक्। सर्वस्यामंत्रितस्याविद्यमानत्व अतएवाग्यव
ध्ययकचामध्व इत्यपि ऋतिङां तिङ इति निघातः।८। अष्टमी मृचमाह। ये यजत्रा इति। यादवाः। यज
त्राः। यष्टव्याः। तथा। ये। देवाः ईड्याः। स्तुत्याः। ते सर्वे पिबंतु वषट्कृति। वषट्कारकाले। वषट्कारयुक्ते काले
यागे वा। हे अग्ने। त्वेत्वदीय याजिह्वा या मध्वं मधुरस्य सोमस्य भागं पिबंतु। यजत्राः गतं। ईड्याः।
ईड स्तुतौ। कृत्यानां एर्यत्। तिस्वरितत्वात् प्राप्ते ईड्वंदवृशंसदुहां ण्यत इति आद्युदात्तत्वं। द्वितीयस्य तस्य
शब्दस्य सुपां सुलुगित्यादेशस्य सर्वमनुदात्तत्वं। मध्वः। पूर्ववत्। त्वस्य नित्यादेश आद्युदात्तत्वं। सुतं। अग्ने आमंत्रित
निघातः। वषट्कृति। करोतेः संपदादिभ्यो भावे क्विप्। विषडित्यस्य करणं यस्मिन्याग इति बहुव्रीहिः
वषडित्यस्य निपातत्वं। नाद्युदात्तत्वं बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं।९। नवमीमृचमाह। आकीं
सूर्यस्येति। विप्रो मेधावी। होता। होमनिष्पादकोऽग्निः। उषर्बुधः। उषःकाले यागगमनाय प्रबुध्यमा
न्विश्वान् देवान् सूर्यस्य संबंधिनो रोचनात् स्वर्गलोकात् इह कर्मणि आकीं। वक्षति। आवहतु। आकीं
निपातः आद्युदात्तः। उषर्बुधः। उषर्बुध्यंत इत्युषर्बुधः। क्विबिति क्विप्। धातुस्वरेण उकार उदात्तः। स
सूर्यस्य। सूर्यशब्दो राजसूयसूर्येत्यादिना क्यपप्रत्ययांतो निपातितः। क्यपः पित्वादनुदात्तत्वे धातुस्वरेणा
द्युदात्तः। रोचनात्। रोचमानात्। रुचदीप्तौ। अनुदात्तेतश्च हलादेरिति कर्तरि युच्। चितइत्यंतोदात्त

त्वं। विश्वान्। क्वन्नंतो नि वाद्युदात्तः।

मासेन्द्र उत्तरपदप्रकृतिः स्वरश्च ॥ निघ्नः ॥ रुद्रौ इत्यादिना रत्नं ॥ निघाद्याघदान्तः ॥ होता ॥ क्रयते स्तो 127
ह्वौल्येन न बहुलं छन्दसीति संप्रसारणं ॥ परपूर्वत्वं गुणः ॥ निघाद्याघदान्तः ॥ इहा ॥ इदमो ह इति ह प्रत्य
यः ॥ इदम इशिति इशादेशः ॥ सर्वादेशः प्रत्ययः स्वरः ॥ वर्द्धाति ॥ वाहः प्रार्थनायां ॥ लिङर्थे लेट् ॥
तस्य तिपः ॥ कर्तरि शप् ॥ शपि परतः सिब्बहुलं लेटीति सिप् ॥ ढत्वकुत्वषत्वानि ॥ तिङः ॥ तिङ् इति नि
घातः ॥ ८ ॥ अग्निष्टोमे प्रउगशस्त्रे स्यपाज्या ॥ विश्वेभिः ॥ साम्यं मधिति स्तोत्रमग्रे वृद शस्त्रादिति खं
डस्य त्रितं विश्वेभिः साम्यं मध्विति याज्येति या मितां याज्या ॥ ८ ॥ स्रुके दशमी ऋच मा ॥ विश्वेभिः सो
म्य इति ॥ हे अग्ने त्वं ॥ विश्वेभिः सार्वैः देवैः सह गादि निर्दिष्टैः ॥ इंद्रेण वायुना मित्रस्य संबंधिभिर्धामभि
स्तोजाभिः ॥ म्रार्त्रिविशेषणरूपैश्च सह सोम्यं सोमसंबंधि मधु मधुरं भागं पिब ॥ विश्वेभिः बहुलं छंद
सीति भिस ऐसादेशाभावः ॥ साम्यं ॥ सोम मर्हति यः इत्यनुवृत्तौ सोमाय [illegible] ति य प्रत्ययः ॥ सोमस्य विका
रः इत्यर्थे यस्येति चेति लोपः ॥ प्रत्ययः स्वरः ॥ मधु फलिपाटिनमिमनी इत्यादिना उप्रत्ययः ॥ निदित्यनुवृ
त्तेर्निघाद्युदात्तः ॥ वायुना ॥ कृवापाजी इत्यादिना उण् ॥ आतो युक् कृत्वि णक्तौ इति युक् प्रत्ययः स्वरः ॥ पि
ब ॥ पा पाने ॥ लोटः ॥ सेर्हिरादेशः ॥ शपि पाघ्रा इत्यादिना पिबादेशः ॥ अतो हेरिति [illegible] शपो लुक् ॥ शपः पिबा 127

हे १

द्वात्तस्वरः। पादादित्वान्न निघातः। ह्यावात स्तिङ इति संहितायां दीर्घः। धाम भिः। धान्नः। आतो मनिन्नि
निमनिन्नुनि स्वरः॥८॥ एकादशी मृचमाह॥ त्वं होता। हे अग्ने। मनुर्हितः। मनुष्या होत्रादिरूपेण मनु
ष्येण हितः। संपादितः। होता होमनिष्पादकोऽयं स्त्वं यज्ञेषु सीदसि। तिष्ठसि। सं च। नोऽस्मदीयमिम
मध्वरं यज्ञं यज। निष्पादय। मनुर्हितः मन्यत इति मनुः। निपातं चयतु वृन्नो बहुलमन्यत्रापि उस। निघा
दाघकन्तः। हितः। धाञो निष्ठेति क्तप्रत्ययः। दधातेर्हिरिति हिरादेशः। मनुषा हितो मनुर्हितः। क
र्तृकरणे कृता बहुलमिति समासः। कृदुत्तरपदप्रकृतिस्वरापवादेन तृतीया कर्मणीति पूर्वपदप्रकृतिः स्वरश्च। सीद
सि। षद्लृ विशरणगत्यवसादनेषु। लटः सिप्। शपि पाघ्राध्मेत्यादिना सीदादेशः। निघातः। सोमम्मि
य त्रसंहितायां। मा विलोप। वत्पादपूरणमिति। तासां लोपे गुणः। अध्वरं। नवि घने ध्वरोऽयस्मिन्नस्त्य
ध्वरः। नञ् सुभ्यामित्युत्तरपदान्तोदात्तत्वं। नो अध्वरमित्यत्र संहितायां मः। पदांतादतीति पूर्वरूपं प्र
सं। प्रकृत्यांतः पादमव्यपर इति प्रकृतिभावान्निवर्तितः॥९॥ द्वादशी मृचमाह॥ युक्ष्वा हीति। हे दे
वाग्ने रोहितः। राहित्कृष्टा निक्षया स्त्वदीया वडवाः रथयुक्ताय जय। दिशस्य पादपूरणार्थः। कीदृ
शीः अरुषीः। अतिमतीः हरितः। हर्त्रीं रथारूढान् पुरुषान्नेतुं समर्थाः। ताभिर्वडवाभिरिहास्मिं

ग१

न कर्मणि द्वानावप्ता सुकृत्तं। सुजिरयामो। लोट् स्वरितत्वादात्मनेपदं। थास्सः सवाभ्यां वामौ। रुधादि
भ्यः श्नं तस्य वा कृत्लकाच्छुक्। ऊर्ध्वशाश्चे प्रत्ययः स्वरेणां तादात्म्यः। संहितायां घ्यसोत स्त्रिङ इति दीर्घः। अरु
षीः। रुगातौ। रंति गच्छंतीयरुषो वडवा। रिहनिभ्या मुच न् धानो ऽलोरपरत्वं। नित्त्वादाद्युदात्तः। अरुषशब्दः।
तस्मात् स्त्रियां छांदसो ङीष्॥ शसि प्रथमयोः पूर्वसवर्ण इति दीर्घः। रथे रोमशैणादिकः ॅ प्रत्ययः। नित्त्वादा
द्युदात्तः। हरितः। हृस्रुरुहि युषिभ्य इतीति हरातेरिति प्रत्ययः। इकार प्रत्यय स्वरेणोदात्तः। रोहितः। रुहेरपि
तानेव सूत्रेणे इतिः। इकारः प्रत्ययः स्वरेणोदात्तः। तामिः। सावेकाच इति विभक्तेः प्राप्तमुदात्तत्वं। साववर्णेति नि
षिद्धात्। देवानां इत्यत्र पूर्ववद्रुत्वानुनासिकौ॥ ८॥ इति प्रथमस्य प्रथमे सप्तविंशो वर्गः॥ ७॥ ॥ इंद्रसोममिति
वत्रार्थंनुवाके चतुर्थं सूक्तं द्वादशर्चं। इंद्रसोममित्यादिकस्य द्वादशर्चस्य सूक्तस्य ऋषिच्छंदसी पूर्ववत्। त
था एतत्सूक्तं रुरसंन तु देवताकं। तथापि प्रत्यृचं इंद्रादिदेवतांतराणि मिलितानि। तथा चानुक्रम्यते। इं
द्रसोमं मृतव्यं तावैंद्री मारुती वाष्ट्र्या ग्नाय्यैंद्री मैत्रावरुणी त्वन्त्सोद्रविणोदस आश्विन्याग्नेय्यृतुदेवताः सर्व
त्रेति। विनियोग स्तु सप्ता त्तोद्रिष्टव्यः। तस्मिन्सूक्ते प्रथमामृचमाह॥ ८॥ इंद्रसोममिति। हे इंद्र सुतं नाम स
हसोमं पिब। इंदवः पीयमानाः सोमाः। त्वा आविशंतु। कीदृशाः। मत्सरासः। तृप्तिकराः। तदोकसः। तन्नि १२८

वासाः। सर्वदा चदुरः स्थायिन इत्यर्थः। इंद्र। पाश्विक मामंत्रिता घ्नदार्थं चां सोमं। अत्तितु स्थि। स्तेंजें त्यात्स्तिामम।
निचादाघ्नदान्नः। पिब। पिबा मित्र स्ये त्यत्रो क्तं। आ वा विशं त्विश्यक्त स्वाक्य गवां रथ्यो तार्थेन सदृस्य त्वश्यर्थ
श्वशाष्ट्रेखुन्नः। अतश्चादिता। पवि नाघती यं प्रथमा [illegible] विचाक्षे न निहन्यात। विशं त्विति। वा लोपसाम्येपि
द्वितीयस्यान्निहन्यत एव। संहिता यामाद्युत्तः। इति प्रातस्य गुणस्य रुयक इतिशाकल्यमतः प्रकृतिभावाद
भावः। इंद्रवः। पवो। त्रियंतर्ई त्यत्रो क्तं। मत्सरा सः। तान्त्रेवो क्तं। आङ्कास्तरस्तु गिन्य स्तुक। तदेव उक स्थानं येषां
ततथोक्ताः। बक्रुवी। हि स्वपद प्रकृतिः स्वरत्वं। आ द्वितीया मृवमात्। मरुतः पिबत ति। हेमरुतः रुत्तनास
क्षापात्रात। पात्र नामकस्य रुत्विजः पात्रा त्सोमं पिबत। ततो समदीयं यज्ञं पुनीत ना। शोधयत। द्रविणोदानवः शान
नदाता। रामरुतः। हियस्मात् यूयं स्थधुमा कंशोधयितृ वंप्रसिद्धं तस्मात्कोर्ये यर्थः। पिबत। अत्र लिङे अड्डुप
दशांक्षपः। परत्वाहूल सार्वधातुकानुदात्तत्वं धातुः स्वरः। पूर्वामंत्रितस्याविद्यमानवत्वेन पदादपरत्वान्निघाता
भावः। सर्ववत्प्रकृतिभावः। पात्रात् पातुः सं बंधि पात्रं। पात्रं तास्य दमिच्यण। तद्धितष्ववामादरिति प्राप्तातद्धिः
सर्वविधयः छंदसि विकल्प्यंत इति न भवति। न चैवमंयस्य रुकारस्यावोञ्णितीति वृद्धिः प्राप्नोति। वाङ्ग्रे
जागत इत्यत्र द्वि विप्रतिषेधपरं कार्यमिति परया आदि वृद्ध्यात्रं ये पत्सर्गणा वृद्धिं बाध्यत इत्युक्तं। इ

॥ एवं तर्ह्यत्रापि अंत्य वृद्धिरौकारः क्रियतां तस्य तु छांदसत्वात् अकारो न विष्यति।

नै आरि

रुत्तुपरस्याः आदिवृद्धिः छांदसत्वेन निवृत्तिरिवादं यद्वृद्धिः प्राप्नोत्येव तिः। एवं तर्ह्यत्रापि अंत्य वृद्धिरौकारः।
क्रियतां। तस्य तु छंदसत्वे अकारो न विष्यति। पुनीत न। प्रजर्भ्येवामि लाट्। लोटा लङ्वदिति लुङ्ः शावात् तस्यत
स्थ स्थमिपामितितादेशः। क्र्यादिभ्यः श्नाइति श्नाप्रत्ययोऽवारितीकारः। तप्तनप्तनथनाश्चेति तनादेशः। प्वादीनां
ह्रस्व इति ह्रस्वः। प्रत्ययस्थ यस्यापि सार्वधातुकमपि दिति। ङित्वास्वस्य [illegible] रिको गुणाभावः। सूर्यं।
सुष्माद्ःपरस्य ज। साडेप्रथमयाः रमित्यमादेशः। न विभक्तौ तुस्माः इति मकारस्य इत्संज्ञा प्रतिषेधः। सूर्य
वयौ जसीति मपर्यंतस्य सूर्यादेशः। शेषे लोपः। अत्र सूर्यादेशात् प्रागवांतरंगत्वात् प्रातिपदिकस्यांतो
दात्तत्वं। शेषनिघातः। ततो सूर्यादेशः स्थानेंतरतम इति सर्वत्रिदात्तः। तत्रापि शेषे लोपं तु लोप इति [illegible]
पूर्वसवर्णदीर्घत्वं बाधित्वा यायमि पूर्व इति प्रातिपदिकांतनदात्तेन [illegible] अनुदात्तस्य सुप एकादेशः। उदा
त्तेनादात्त इत्युदात्तः। टिलोपपक्षे उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। स्थ त्र सत्सुवि। लटो मध्यमब
हुवचनं। अत्यादि प्रभृतिभ्यः शप इति शपो लुक्। अशोरल्लोपः। इयांकार लोपः। व्यचायनषत्वं। हिर्वाति
निषेधात्तिङः तिङ इति निघातो न भवति। संहितायामन्येषामपि दृश्यत इति दीर्घत्वं। सुदानवो सूर्यं हिर्स्थे
ति विवक्षितं। सुदानवः। दामाभ्यां तुः सोः प्रादिसमासः। आमंत्रितनिघातः। अत्र सूर्यमिन्य [illegible] सुदान १२९

अत्र र

वः। स्थितिनविधीयते। येन अनामंत्रितत्वान्निघातो न स्यात्। किंतु। सुदानव इति सुदानव सिद्धवद्भावात्त्वेन
संबोधनात् तत्र मारुत स्तुत्के मुमरुतां प्रसिद्धान् प्रभावातिशयान् सूयंस्थेतिसुष्मच्छब्देन प्रतिनिर्दिश्य
पुनीतान तिप्रार्थ्य निपवानात् तेषां दृष्ट्वं दिशब्दे नाच्युत। भारतीया मूर्चमाह। अभियज्ञमिति। ग्नाशब्दः
स्त्रीवाची। तथाच यास्कआह। मेना ग्ना इति स्त्रीणां मनामानयं यग्नां गच्छंत्येन इति ग्नाः। अस्य संतीतिग्ना
वान्। निष्टृशब्दो ऽत्र त्वष्टारं देवमाह। कस्मिंश्चिद्दिवसात्र निष्टृ वेन चष्टुर्वृत वान्। दृग्नावः पत्नी युक्तेन
त्वष्टः नोस्मदीयं यज्ञमभिगृह्यहि। अभितो दत्वा नां समीपस्तुहि। रत्नधा सत्वं सोमं पिब। हि यस्मा
त्वं रत्नधा असि। रत्नानां दाता अदाता भवसि। तस्मात् सोमं पातुमर्हसीत्यर्थः। अभि। उपसर्गाश्चाभिवर्जमिति
पर्युदासाद्दातारं तादात्तत्वं। गृणीहि। गृ शब्दे। लोटि सिपो हि। क्र्यादिभ्यः श्ना। हर्डि चाद्धे ग्नाद्य रितीत्वं।
आप्रश्ने यस्य ङित्वा द्गुणा भावः। ग्नादीनां ह्रस्वः तिङः तिङ इति निघातः। ग्नाः अस्य संतीति मतुप्। वयये न
मादुपसः वत्वं। संबुद्धौ मतुवसो रुरिति रुत्वं विसर्गः। पादादित्वेनामंत्रितनिघाताभावात्। षाष्ठिकामंत्रिताद्युदात्त
त्वं। ग्नाव इत्यस्य विशेषणतया विशेषवचनत्वा त्रामंत्रित समानाधिकरण इति निषेधाभावादवि
घमानवत्त्वाभावात् त्तरस्य नेष्टृ शब्दस्य षाष्ठिकमाद्युदात्तत्वं। पिब। शपः पिबादेशः स्वरः। उर्वयोरामंत्रित

रत्नानि दधातीति रत्नधाः क्विपि क्विप् धातुस्वरः।१

यार विद्यमानवत्त्वेन निघाताभावः। समासेऽन्तदुत्तरपदप्रकृतिः स्वरत्वेन स एव शिष्यते। असिस्विपः पि
बाद्यन्तः स्वरः। तिङ् तिङ इति निघातो न भवति। द्वितीयार्धप्रतिपादनार्थं चतुर्थीमेवमाह। अग्ने देवानिति। दे
१३० अग्ने देवानिहास्मिन् कर्मणि आवह। ततो या निष्कुस्थाने शुन्ध्युष सवने सुसादय। देवानुपावेशय। ततस्ता
न्परिभूषालंकुरु। ऋतुना सह त्वं सोमं पिब। अग्ने देवानियर्यं पादेगतः। योनिषु ग्रामिश्रे। वहिश्रीत्यादि
नानिप्रत्ययः। निपातादाद्युदात्तः। त्रिषु पुंसि ऋतुभ्यो हलादिरिति विभक्तेरुदात्तत्वं। भूषा भूष अलंकारे।
तिङ् तिङ इति निघातः। पिब ऋतुना गाता। पंचमीमेवमाह। ब्राह्मणादिति। हे इन्द्र ब्राह्मणात् ब्राह्मणाच्छंसि
रु आ संबंधि तु राधसो धनं मृतान्पात्रात् सोमं पिब। किं रूपः। ऋतून् ऋतुना देवान् अनुसृत्य ऋतुपे पिब त्वियर्थः। वो
द्वियस्मा भवतु। तव सख्यं। अस्तृतं। ऋतूनां अविच्छिन्नं। तस्माद् ऋतुभिः सह पानं युक्तं। ब्रह्मशब्देनात्र ब्रह्मव
र्गद्वितीयो ब्राह्मणाच्छंसी कथ्यते। सप्तम्यद्विगे शेषनिघातेनानुदात्तादि। तस्य संबंधी उद्विश्यमसः
सवनस्येवावयववन्नियत इत्यत्र यत्र विवक्षायामनुदात्तादेरत्र तन त्रिवादाद्युदात्तत्वम साः परो नब्राह्म
णशब्दः। राधसः। सर्वधातुभ्योऽसुन्। निपातादाद्युदात्तः। पिबा पादादित्वा दाशवं। द्यचोतस्तिङ इति दीर्घत्वं। स ५२०
त्वनूं रत्नि यत्र दीर्घादटि समानपाद इति नकारस्य रुत्वं। अत्रानुनासिकः। पूर्वस्य तु वा युकारस्यानुनासि

कर्चं। तव युष्मदस्मद्भ्यां ङसोऽश्। शिवा सर्वादेशः। तवममौ ङसीति तवादेशः। युष्मदस्मादोऽङसी
त्याघृदात्तत्वं। सख्यं सख्युः। केर्मसख्यं सख्युर्यः। यस्येति लोपः। प्रत्ययः स्वरः। अंहूरणात् हिंसा
र्थस्योरूः। नञ्समासः। अव्ययपूर्वपदप्रकृतिः स्वरत्वं॥८॥ बष्टी मृत्व माह॥ युवं दक्षमिति। एधृतव्रता
स्त्रीकृत कर्माणौ मित्रावरुणा। हे मित्रनामक वरुणनामकौ देवौ। मैत्रेयो युवां रुत्तुनासदे अस्मदी
यं यज्ञमाशाथे। व्याप्नुथः। कीदृशां यज्ञं। दक्षं प्रवृद्धं। दूतेनं ऊढं शत्रुभिर्दस्युं विनाशयितुं मशाकुमि
यर्थः। युवं। प्रथमा द्विवचनस्य। युप्रथमायामित्यमादेशः। युवावौ। द्विवचनइतिमपर्यंतस्य युवा
देशः। शेषेलोप इतिटिलोपः। अंत्यलोपो वा। अमिपूर्वत्वं। भाषायामेव सावेवं। टिलोपपक्षे अकुदा
त्तनिवृत्तिः स्वारणअ मत्वात्तत्वं। अंत्यलोपपक्षे एकादेशउदात्तः। दक्षं। दक्षष्टिदिद्धौ। दक्षं यतनानति
करणे घञ्। एवं द्विप्रवृत्तिं गचनियमः। अन्यस्यानियमनपुंसकत्वं। धृतव्रता। मित्रावरुणौ। धृतानि
व्रतानि याभ्यां तौ धृतव्रतौ। मित्रश्च वरुणश्च मित्रावरुणौ। तत्र यत्र सुपां सुलुगित्यादिना विभक्ते
राकारः। मित्रशब्दस्यादेवताद्वंद्वे चेत्यानङादेशः। प्रथमस्यामंत्रितनिघातः। द्वितीयस्यपादादि
त्वाद्युदात्तः। संहितायां छांदसं ह्रस्वत्वं। रुत्तुनां। दहनस्मी करणे। डुः रवेनदल्लत इति कुर्दहं। व्यय

इषद्दुःसुइत्यादिनाकुरित्युपपद
दग्धेःखल्।

रेफस्य लोपः उकारस्य ऊकारः।१

अनित्यमागमः२

दा१ दा१

त्याबकुलमिति विन्निके राकारः।मिन्नशब्दस्य ऊकारस्य उकारादकारस्य नकारः।लितीति प्रत्ययात्पूर्व

मुदात्तत्वं।उत्तरपदत्वेनस एव शिष्यते।आशाथे।अश्नुव्याप्तौ।छंद सिलुङ् लङ् लिट इति वर्त्तमाने लि

131 टः।मध्यमद्विवचनमाथे।टारत्वं।अत आदेरिति अभ्यासस्य दीर्घः।अश्नोतेश्चेति व्याप्तौ नुडागमः।शासनं इति

निवर्त्तते।इति प्रथमस्य प्रथमे अष्टाविंशो वर्गः।।८।। सूक्ते सप्तमीमृचमाह।।द्रविणोदा इति।अध्वरे अग्नि

ष्टोमे प्रकृतिरूपे यज्ञेषु विकृतिरूपेषु उक्थ्यादिषु च देवमीलाना ऋत्विजः स्तुवंति।कीदृशा ऋत्वि

जः।द्रविणसो धनार्थिनः।ग्रावहस्तासः।अभिषवसाधनपाषाणधारिणः कीदृशं देवं।द्रविणोदाः

इनोती धनप्रदं धनप्रदं।यद्वा धनप्रदो ऽग्निः सोपि नहि निशेषः।तामतं मंत्रं यास्क एवं निर्ब्रवीति।द्रविणोदाः

कस्माद्धनं द्रविणमुच्यते।यदेनमभिद्रवंति बलं वा द्रविणं।यदेनेनाभिद्रवंति।तस्य दाता द्रविणोदा

ः।तस्यैषा भवति।द्रविणोदा द्रविणस इत्यादि।सोयं यास्को निर्वचनप्रपंचः।तस्मिन्नेव ग्रंथे ऽव

गंतव्यः।द्रविणोदाः।द्रुदक्षिभ्यामिनन्।।निर्वादादघ्रदातौ द्रविणशब्दः।तद्ददातीति द्रविणोदाः।कि

प्चेति क्विप्।पूर्वपदस्य सकारापजनः छांदसः।ऋचो विभाषोत्तरपदप्रकृतिः स्वरत्वं।देवविशेष

णो चानेकवाक्यतापत्ते द्वितीयायाः सुपां सुलुगिति आदेशः।अथवा।द्रविणमात्मन इच्छति।द्रविणस्यति। १३१

६

सुपश्चात्मनः क्यच्। सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः॥ इति क्यचि परतः॥ सुगागमः॥ द्रविण
स्यानं संपदादित्वात् क्विप्। अतो लोपः॥ क्विपो लुप्तं न स्थानिवद्भवतीति तस्या स्थानिवत्त्वप्रतिषेधाद्य
लोपः॥ एवं द्रविणसुशब्दो धनस्य वचनः॥ द्रविणस्यं ददाति। याथिष्टं धनं प्रददातीनां प्रवृत्तयतीत्यर्थः। द
सुगुपपदाय द्दय सो दातेर्न्नीवितण्यर्थो क्विब्विति क्विप्। एवं द्रविणोदः शब्दः सकारान्तो भवति। तथा द्रा
विणोद सांध्रवाद भवंतीति निरुक्तो यव दार उपपद्यते। अतो द्रविणोदस् शब्दः भिन्नवाक्ये स्वार्थे
प्रथमा एकवाक्यत्वे तु व्याख्यायन द्वितीयार्थो भवति। द्राविणोदस इन्द्र त्वापि वाक्यं भिदपदे द्रविणोदे — द्रविणोदः॥
यः॥ सो मस्येयार्थे सकारापज नष्टांदसः। आ घ ददातव्यं तं निया मनस्थितं। स्त्रियां च विशेषणे चैकेने
कवाक्यत्वपदे तु कपरान्तं क्विप्। अतो लोपादि पूर्ववत्। अत्रत्वपदे कथवाष्वि चैनां तादात्तत्वे
धुरुणा वाग्नयस्य यया घददातं। ग्रावहस्ता यथा ततोऽप्रावहस्तासः। आज्ञास्सरस्रुक्। ग्रावशब्दो दृषा दि
चादाघददातः। बजुव्री हो पूर्वपदप्रकृतिः स्वरत्वं। अधार। नविघातत्रैधारादिसायस्मिन्। नन्नसुन्या
मिन्यन्तरपदं तादात्तत्वं। ईलाते। अनुदात्तेत्वादात्मनेपदं। अदिप्रभृतिभ्य इति शपो लुक्। कृत्य आदे
शः॥ ८॥ अष्टमीमृचमाह॥ द्रविणोदाददातु चिति। द्रविणोदादावानास्मभ्यं वस्तुनि धनानि ददातु आया

निधनानि श्रुत्विार। हविरूपयुक्तात्विनश्च यंता। तानि सर्वालिधनानि दावष्टुनिमित्तम्न्तेष्टुवना
जा मादुसं मजगमष्ठाधनिर्दिवान्यष्टुं तानि स्त्रीकर्मण्ययर्थः। द्रविणोदाः गतं। वसूनि श्रुस्व। स्त्रिहीयादिना
132 उप्रययः। निदित्यवृत्तराघ्नदात्तः। श्रुत्विार। श्रवणो छंदसि लुङ् लङ् लिट इति वर्तमाने लिट्। कूंश स्य ३
रस्त्वा छंदस्यम यथेति सार्वधातुकत्वे व्यत्ययेन श्लुः। तस्मं नियोगनश्च नावश्च। उवंङ् प्राप्ते ऊर्णोः सा मु ४
र्वधातुक इति यणादेशः। वितिष्ट्याता दात्तत्वे यद्वृत्तान्नित्यमिति निघात प्रतिषेधः। तास्रा; छंदसि बहु
लमितिशि लोपः। नलोपः प्रातिपदिकांतस्येति लोपः। वनाम हावनषण संभक्तौ। व्यत्यायनात्मनेप
दं। ठा॥ नवमी मूल माह॥ द्रविणोदाः पिपीषतीति। द्रविणोद्रवीस्तु निः सहनेष्ट्रातानष्ट्र संबंधि दा ६
पात्रात् पिपीषति। सोमं पातुमिच्छति। ततोहुस्त्विजः। इष्यतौ द्रविणोदाः गतं। पिपीषति। पापाने
पा। तु मिच्छतीति। सन् छांदसईकारः। तिङ। तिङ इति निघातः। जुहोत। लोण्मध्यमबहुवचनं। तस्य
लड्ढ् स्नावान्नादेशः। तस्य तप्तनप्तनथनाश्चेति तनबादेशः। तस्य पित्वाद्गुणः। अभ्यस्तानामादि
रित्यस्त्ववृत्तौ अनुदात्तं। तन्यान्तुदात्तत्वे प्राप्ते भीह्री भृहुमदजनधनदरिद्रा जागरां प्रत्ययात्पूर्वं १३२
पितीत्याकारिउदात्तः। तिष्ठत। एछागतिनिवृत्तो। लोट्मध्यमबहुवचनस्य लड्ढ् स्नावान्नादेशः।
होमस्थाने गच्छत। गत्वा च जुहोत। होमं कुरुत तद्वा च
पश्चि... होमस्थानात् स्थानान्तरं प्रति प्र स्थानं
मपि कुरुत॥ ५

नस्त्री

शपि पाघ्राध्मेत्यादिना तिष्ठादेशः। स मव प्रविभ्यः स्छ इति आत्मनेपदं न भवति। तत्रान्तु वृन्ये न्येमि
र्दिष्ट ग्रहणं स्यानंत र्यार्थं त्वात्। अत्र व शब्देन व्यवधानात तु प्रागधातोरित्युपसर्ग। त्वेनप्राक् प्रयो
२ थ क्तस्यापिप्रशब्दस्य व्यवहिता श्चेति छंदसि व्यवहित प्रयोगः। अत्र वेशब्दो नु हो ती नि प्रू वेण संहसमु
च्चयार्थः। न तु न रिष्यतो न्फन्नरत नन्तु प्रथम त्वात् ता वा या या ग प्रथमेति निघातः भावान्तिङ् तिङ् इति नि
घातः। नच्छा तो पोत्रा घङ्गं तु नी न ननु वेशब्देन यदुक्तं तदत्र द्रष्टव्यं। इष्यतः। इत्यात्मानो न्येऽध्यमबद्धव थ ५
चनं॥ ता दशी मी भूवमा ह॥ यच्चातुरीयमिति। तृडविणो दोदवाय घस्मात्कारणात्। सतु तिः स ह
जामहे त्वं यजामहे। अथ च्छंदयं नि पातः [illegible] र्थः। तु स्मा कारणान्नो स्मभ्यं ददिर्धि न स्य दाता नवस्म। अव
श्यं भवेत्तुरीयं। चतुर्संख्यापूरणेः चतुरः। छयतो घप्रत्यय त्वरयोः पितिक्रप्रत्ययः। तस्य प्रत्ययस्वरे
णोदात्तात् प्रागेव आयने यीनि त्यादिनाईयादेशः। आयनादिषु तु पादे शिव द्वव नंस्वरसिद्ध्यर्थमि
ति वचनात् स्यात आ दोश प्रत्ययस्यारणईकार उदात्तः। द्रविणोदं उक्तं। पादादिवादा मे त्रिता पदान्त
चं। तिङ्श्च लसार्वधातुकस्वारण धातुस्वर एव। हर्वस्या मंत्रितस्यापि विघमानत्वाघ हृत योगा द्वान नि
घातः। व्यवहितयोगापि हि सनि वेध इत्युक्तं। अथ छांदसो धकारः। स्मदादिर उदात्तः। संहितायां नि
यजामहे शपः पि वादनुदात्तत्वं २ अर २

पातस्यवेतिदीर्घः। ददिः। ञुदाञ्दाने। आदृगमहनजनः किकिनौ लिट् चेति किप्रत्ययः। किं लिङ्वत्
द्विर्वचनादि। आतो लोप इटि चेत्याकारलोपः। प्रत्ययस्वरः॥ ५॥ एकादशीमृचमाह॥ अश्विनापि
बतमिति। हे अश्विनौ मधु। माधुर्योपेतं सोमं पिबतं। कीदृशौ। दीद्यग्नी। द्योतमानाग्नी याहवनीयाद्य
ग्निर्याभ्यां। शुचिव्रता। शुद्धकर्माणौ। ऋतुना। ऋतुदेवतया सह। यज्ञवाहसा। यज्ञस्य निर्वाहकौ। अश्वि
ना। संबोधनद्विवचनस्य सुपां सुलुगित्याकारः। आमंत्रिताद्युदात्तः। पिबतं। शपः पित्वादनुदात्तत्वं॥
तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यात। मधु। फलिपाटि इत्यादिना उ प्रत्ययः। निदित्यनुवृ
त्तेर्नित्वादाद्युदात्तः। दीद्यग्नी। दिवु क्रीडादौ। अन्येभ्योपि दृश्यत इति क्विप्। वेरपृक्तलोपात्। लोपो व्यो
र्वलीयानिति। प्रथमं वकारस्य लोपः। प्रथमं प्रत्ययलोपे हि वर्णाश्रयविधौ प्रत्ययलक्षणं नास्तीति नि
षेधात् वलि लोपाभावस्यात् छान्दसं द्विर्वचनं। तुजादित्वादभ्यासस्य दीर्घत्वं। यङ्लुगन्ताद्वा संज्ञापूर्वको
विधिरनित्य इत्यभ्यासस्य गुणाभावः। दीदिरग्निर्ययोस्तौ दीद्यग्नी। आमंत्रिताद्युदात्तत्वं। पादादित्वा
न्न निघातः। शुचिव्रता। शुचि व्रतं ययोस्तौ। सुपां सुलुगित्याकारः। दीद्यग्निशब्दस्य सामान्यवचनत्वेन
नामंत्रित इत्यविद्यमानवत्त्वं प्रति विधानादष्टमिक निघातत्वं। सर्वस्य परांगवद्भावाद्वा। एकवर्ज्यं। यज्ञवा

हस्ता। वहूंवापतो। यज्ञं वहन्तु इति यज्ञवाहसो। वहिहाधाञ्भ्यः छंदसीत्यसुन्। तत्र दिगतिकारकयो
रपि। पूर्वपदप्रकृतिः स्वरत्वं। त्वितिवचनात्सोपपदानामपि भवतीत्युक्तं। तिदित्यनुवृत्ते रूपधावृद्धिः।
सुपांसुलुगित्यादिना विभक्तेराकारः। आमंत्रितनिघातः। आसमर्थात्पूर्वस्यनपरांगवद्भावः।। वा
दशीमेवमाह।। गार्हपत्येन संत्येति। हे संत्य फलप्रदाग्निदेव। गार्हपत्येन। गृहपतिसंबंधिरूपेण यु
क्तः सन्। ऋतुना। ऋतुदेवेन सह यज्ञनीः। यज्ञस्य निर्वाहकोसि। तस्मात्त्वं देवयता देवविषयका
मनायुक्तात् यजेः यजमानाय देवान्यज। गार्हपत्येन। गृहपतिना संयुक्तेभ्यः। यस्येति लोपः।। शिवा
दादित्वा द्विराघृतान्तत्वं। वा गृहपतिश्च मिथ्यर्थे पत्यंतपुरोहितादिन्य इति यकि चेत्तोदात्तत्वं स्यात्।
संत्य। सनान भव। षण दाने। क्तिचक्तौ चेति क्तिच्। न क्तिचि दीर्घश्चेति दीर्घः।। नलोपाभावः।। भवेच्छंद
सीति यत्। तत्र साधुरिति वा निघातः। यज्ञनीः। यज्ञं नयतीति यज्ञनीः। सत्सूद्विषेत्यादिना क्विप्। उ
त्तरपदप्रकृतिः स्वरः। देवयता। देवानात्मन इच्छतीति देवयन्। नास्मे क्यचि चेतीत्वं तीत्वं न भवति।
नच्छंदस्यपुत्रस्येति निषेधात्। अश्वाघस्येत्यात्वविधानादाचानिषेध प्राप्तस्य दीर्घस्यापि एष
निषेध इत्युक्तं। शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं। अत्र क्यचः। चित्वादंतोदात्तत्वं। शपः पि

वादन्तुदात्तत्वं। शतुश्चलसार्वधातुकस्वरेणन्मायाः कथ्वासद्धिकादाशा। एकादशन्तदाशे त्नादाश्वइ
त्यत्रात्तः। तस्मादंताडात्परस्यां विभक्तेः शतुरनुमो नद्यजादी इत्युदात्तत्वं॥७॥ इति प्रथमस्य प्रथमे
एको त्रिंशोवर्गः॥७॥ आत्वावहंत्विति तत्रार्थमनुवाके नवर्चं पंचमं सूक्तं। आत्वावहंत्विति नवर्चं सूक्तं। ऋषि
छंदसी पूर्ववदनुवर्तेते। विशेषादेशाभावादिंद्रो देवता। तथा चानुक्रांतं। आ त्वा नव ति। विनियोग
स्तु प्रातः सवने मैत्रावरुणस्योन्नीयमानसूक्तं। आत्वावहंतु हरय इति। तथा च दिदेवत्यैश्चरंतीति खं
डे सूत्रितं। उन्नीयमानेभ्यो वाहा त्वा वहंत्विति। तथा षोडशिनीशस्त्रे। आत्वावहंतु हरय इति तिस्रः। तथा
सूत्रितं। अथ षोडशीति खंडे। आत्वावहंतु हरय इति तिस्रो गायत्र्य इति। तस्मिन् सूक्ते प्रथमामृचमाह॥
आत्वावहंत्विति। हे इंद्र। वृषणं। कामानां वर्षितारं त्वां सोमपीतये। सोमपानार्थं। हरयः। त्वदीया अश्वाः
आवहंतु। अस्मिन्कर्मण्यानयंतु। तथा सूरचक्षसः। सूर्यसमानप्रकाशयुक्ता ऋत्विजः। त्वां मंत्रैः प्रकाश
यंत्विति शेषः। हरयः। हरंतीति हरयः। इन्। सर्वधातुभ्य इन्। नित्यादाद्युदात्तः। वृषणं। कनिन्युवृषि
तक्षीत्यादिना कनिन्। किं चाद्युपधस्य गुणाभावः। वा षपूर्वस्य निगमे इति विकल्पित उपधादीर्घत्वं। सोम १३४
पीतये। एतेनिरत्यय इत्यत्र व्याख्यातं। सूरचक्षसः। चष्टेः व्यख्यायां वावि। सर्वधातुभ्योऽसुन्। चष्टेः ख्याञिति
निर

अलंकरतोपस्तरणानि धारतो घृतस्नावितीः। धीयंत इति धानाः। धापृवस्यज्यतिभ्यो न इति नः प्रत्ययस्वरः। घृतस्नुवः। ६

नलवति। अन नाम्नोः प्रतिषेधोवक्तव्य इति निषेधात्। इरो रात्। वसंतीति स्नरः। सुसृधागृधिभ्यः क्रन्निति क्रन्। किचाद्गुणाभावः। नित्यादाद्युदात्तः। स्नरवत्तरथा नं प्रकाशो येषां। बहुव्रीहौ पूर्वपदप्रकृतिःस्वरत्वं। ३
द्वितीयामृचमाह॥ इमा धाना इति। हरिशब्दस्येंद्ररथस्य वोढारौ अश्वावाव ष्टां। तथा च स्कंयं तरं। हर्योः
स्थाता हरिभ्यां चेंद्रो देवतांगम या चेति। एतादृवाह्नि प्रत्यनि र्घुडुकार आ। हरी इंद्रस्येति। तादृशौ हरी
इमां यागार्थां विधामासादितवेनड्वारा वर्ति नीहुतिनाः। भृष्टयवतंडुलात्रुद्भिश्यसुरवतामरायिइंद्रमवक्षा प्रा
प्नित्वकर्मणि उपवक्षतः। वहितसमीपवहतां। कीदृशीर्धानां घृतस्नुवः। घृतं स्नवंतीति घृतस्नुवः। धि पिडग
भावः छांदसः। धातोः स्वरः। समासस्तत्पुरुषे पदप्रकृति स्वरत्वं। स्नां यणि सर्वव्यचेन यणाभावाद्युवङादेशः। ऋकारस्यं ५
हरी। हृञ् हरणे। सर्वधातुभ्यः इन्। नित्यादाद्युदात्तः। प्रगृह्यस्य चा संहितायां प्रकृतिभावः। वक्षतः। प्रार्थना
स्वे लिंगार्थी लट्। तस्य प्रथमपुरुषद्विवचनं तस्। लेटोडाटावित्यडागमः। शापि प्राप्ते। सिब्बहुलं लेटीति
सिप्। व्यचोऽयषवत्रानित्यतिङः तिङ इति निघातः। सुरवतामगनं॥ तृतीयामृचमाह॥ इंद्रं प्रातरिति। प्रातः
कर्मारंभे प्रातः सवनिइंद्रं हवामहे। आह्वयामः। तथैव अध्वरासामयागप्रयति प्रगच्छति। प्रातरुप
क्रममाणसति माध्यंदिनसवने तमिंद्रं हवामहे। तथा यज्ञस्य समाप्त्यवसाने तृतीयसवने सोमस्य पी

135

तायासोमपानार्थं हवामहे। घातः स्वरादिषंतोदांतौ दांतौ निपातितः। ह्वामहे ह्वेञो लटि शपिपरतो
ह्वः संप्रसारणमिति अनुवृत्तौ बहुलं छंदसीति संप्रसारणं। रं पर पूर्वत्वं च। गुणावादेशौ। प्रयति। इणो ग
तौ। लटः शतृ अदिप्रभृतिभ्यः शपः इति शपो लुक्। शतुर्ङित्वाद्गुणाभावः। प्रादिसमासः। लङ्ग्रहणं ग
तिकारकपूर्वस्यापि ग्रहणमिति वचनात् प्रत्ययग्रहणे इति नियमाभावात्। शतुरनुमो नद्यजादी इति वि
भक्तेरुदात्तत्वं। अधारउक्तं। संहितायामुदात्तः स्वरितयोर्यणः स्वरितोऽनुदात्तस्येति अकारस्य स्वरितत्वं।
पीतये। पा पाने। क्तिनि छांदसमंतोदात्तत्वं॥ चतुर्थीमृचमाह॥ उप न इति। हे इंद्र केशिभिः केसरयु
क्तैः हरिभिः राधोभ्यां नोऽस्मदीयं सुतमभिषुतं सोमं प्रति उपसमीपम् आगहि। आगच्छ। सुते अभिषुते
सोमे निमित्तभूते सति यस्मात्कारणात्त्वां हवामहे। वामाहृयामः। तस्मादागच्छेति पूर्वेणान्वयः। ग
हि। गमूलॢ गतौ। लोटः सेर्हिः। शप इत्यनुवर्तमाने बहुलं छंदसीति शपो लुक्। इषुगमियमां छः इति छत्वं न भवति। न
लुमतांगस्येति प्रतिषेधात्। अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः। तस्यासिद्धवदत्राभादित्यसिद्धव
त्त्वात् हेरिति लुक् न भवति। केशिभिः। मत्वर्थीय इनिः प्रत्ययस्वरः। हवामहे। ह्वः इत्यनुवृत्तौ बहुलं १३५
छंदसीति संप्रसारणं। शिपः। पित्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वारेण धातुः स्वर एव। तिङ् इति

इति निघातः॥ हितेति घतिविधन्त॥ ७॥ पंचमीमृचमाह॥ समंमिति॥ हे इंद्र सर्वां नोस्मदीयमिमं स्तोमं
स्तुतिं प्रति आगहि। आगच्छ। आगमेर्नाद्देरुत्पात। उपाद्वयज्ञनसमीपसुतं अभिषुत सोमवत्कमिद
मिदानी मनुष्ठीयमानं सवनं प्राप्त। सवनादिरूपं कर्म वर्त्तते। तस्मात् हो रोन॥ गोरम्रगश्ववृषितः सन्नि
मं सोमं पिब। सं इममित्यत्र संहितायां। सावितो पादवृत्तौ पादपूरणमिति स्तुलोपः। गहि। गतं सवनं। स्तुय
तोस्मिन सोम इत्यधिकरणे त्वक टालिनीतिप्रत्यया त्सूर्वस्योदात्तत्वं। व्यकडंतास शम्याः स्तुपां स्तुपोन्नवतीति
वक्तव्यमिति वचनात्तद्धिती या अभिषुतसोमवत्कमिदं सवनं इति कर्मण्येववाद्धिती यातदा सुतशब्दा
दर्श आदित्वादचू। जिन्तष्टापिपासायां। तिष्ठा नोष्ठतिक्तः। प्रत्ययःस्वरणोदात्तः। पश्चादिटो आगमात्र
नुदात्ताः। इयनुदात्तत्वं॥ इति प्रथमस्य प्रथमे त्रिंशो वर्गः॥ ७॥ सूक्ते षष्ठीमृचमाह। इमे। सामासइ
ति। इंदुशब्दः। उंदी क्लेदन इति धातोरुत्पन्नः। इंदवः। क्लेदनयुक्ता इमा वद्यामवस्थिताः सोमास्तत्रतत्र
गताः। सोमा बर्हिषि यज्ञे अधि आधिक्ये सुतासः। अभिषुताः। हे इंद्र सद्दसे बलार्थं तान् सोमान् पिब।
सोमासः। आज्जसेरसुगिति जसो सुगागमः। इंदवः। उक्तं। सुतासः। पूर्ववदसुक् संहितायां प्रकृत्यां
नः पादमध्यपर इति प्रकृतिभावात् परपूर्वत्वं न भवति। बर्हिषि। वृंहेर्नलोपश्चेति इस्प्रत्ययः यः स्वरः।
x सुतासः अभिषुताः। इमे सोमासः सोमाः अधिबर्हिषि वेद्यां
x मास्तीर्णे दर्भे ग्रहचमसादिषु संपादिताः इति शेषः। ४

रुध्रुभ्यां ङे रूपसंख्यानमित्यनुरूप

तौ॥ इंद्र यत्र दीर्घादटि समानपाद इति रुत्वं। यत्वयलोपौ। अनुनासिकः। सहस्रेष्वहमर्षणे। अस्तु नं
तो निघाताद्युदात्तः॥ ७॥ सप्तमीमृचमाह॥ अयं त इति॥ हे इंद्र। अयमस्माभिः क्रियमाणः॥ स्तोमः स्तोत्र अथ स्तो रे
विशेषः। अग्रियः॥ श्रेष्ठः सन्॥ तव हृदिस्पृक् मनस्यंगीकृतः शंतमः सुखतमोऽस्तु॥ अथानंतरं। सु
136 तमभिषुतं सोमं पिब। अग्रियः। अग्रादित्वाद्घ प्रत्ययः। वितिघ वा। विघातादात्तः। हृदिस्पृशतीति हृ
दिस्पृक्। स्पृशोऽनुदके। क्विन्। तत्पुरुषे कृति बहुलमित्यलुक्। क्विन्प्रत्ययस्य कुरिति शकारस्य कुत्वं। उ
त्तरपदे प्रकृतिः स्वरत्वं। शंतमः। सुखकर इत्यव्ययवाची शम् शब्दः। ततस्तमप्। अत्र सुखप्रकर्षस्यो
णद्वारा गुणनिष्ठद्रव्ये संक्रांतत्वाद्द्रव्यप्रकर्ष इति निषेधात् किमेत्तिङव्ययादाम् न भवति। द्रव्यस्य स्व
५६ तः॥ प्रकर्षाभावात्। ईशार्थ एव हि स निषेधः। अथा सोमं। संहितायां निपातस्य चेति दीर्घत्वं॥ ८॥ अष्टमी
मृचमाह॥ विश्वमिदिति॥ वृत्रहा। शत्रुघातक इंद्रः। सोमपीतये। सोमपानाय मदाय। तत्पानजन्यहर्षा
य च। विश्वमित् सर्वमपि सुतमभिषुतं सोमं सवनं प्रातःसवनादिरूपं कर्म गच्छति। विश्वं। असिप्रु
षीयादिना क्विन्नन्निघातादाद्युदात्तः। सवनं सुतं सर्ववत्। मदाय। मदोऽनुपसर्ग इत्यप्। पोपिचाद्युदात्तस्वरः। १३६
गच्छति। इषुगमियमां छः। वृत्रहा। वृत्रं हतवान्। ब्रह्मभ्रूणवृत्रेषु क्विप्। इन्हन्निर्यादिना निहतं

सामर्थ्यानयोर्व्यधिकरणबहुव्रीहिरित्युक्तं। तत्पुरुषे बाधा दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं।

दीर्घत्वं। सोमवति प्रतिप्रवो सौऽभवति। रुडुत्तरपदप्रकृतिःस्वरत्वं॥ ८॥ नवमीमृचमाह॥ स इमं नः काममि
ति। हे शतक्रतो त्वं नो स्मदीयमिमं कामं काम्यमानं फलं गोभिरश्वैश्च सह आ पृण सर्वतः पूरय। वयम
पि स्वाध्यः सुष्ठु सर्वतो ध्यानयुक्ताः सन्तः त्वां स्तवाम। स इमं। संहितायां सोचि लोपे चेत्पादपूरणमिति सु
लोपः। कामं। कामधृषिकर्षीचि ताद्वयौ तउदात्त इत्यन्तोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वं। पृण
प्रीणाने। लोटसेर्हिः। तुदादिभ्यः शः। तस्य ङित्वाद्गुणाभावः। अतो हेरिति हेर्लुक्। गोभिः। सावेकाच इति
प्राप्तविभक्त्युदात्तत्वं। न गोश्वन्साववर्णेति प्रतिषिध्यते। अश्वैः। क्वन्नंतः यन्नंतः सामर्थ्यान्निपरागु
वन्नावः। स्तवाम। ष्टुञ् स्तुतौ। धात्वादेः षः सः। लोडुत्तमबहुवचनस्य। लोटो लङ्वदिति लङ्वद्भावात् नित्यं ङितः
इति सकारस्य लोपः। आडुत्तमस्य पिच्चेत्याडागमः। पित्वादनुदात्तत्वं। धातुस्वर एव। स्वा
ध्यः। ध्यै चिन्तायां। स्वाङौ उपसर्गौ। ते प्राक् प्रयोगः। अन्येभ्योपि दृश्यत इति क्विप्। दृशिग्रहणस्य वि
धान्तरोपसंग्रहणार्थत्वात् अत्र संप्रसारणे सति परस्य पूर्वत्वं। हल इति दीर्घः। जसि एरनेकाच इति यणा
देशः। गतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरत्वं। उदात्तयणो हल्पूर्वादिति जस उदात्त
त्वं न भवति। तत्रासर्वनामस्थानमित्यनुवृत्तेः। स्वरितायां यणः स्वरितात् उदात्तस्येति स्वरितत्वमेव भवति॥ ९॥

न्यपतेः उदात्तः

इतिप्रथमस्यप्रथमेएकोनत्रिंशोवर्गः॥छ॥इंद्रावरुणयोरितिवत्रार्थेनुवाकेषष्ठंनववर्चंसूक्तं।इंद्रा
वरुणयोरित्यादिकंनववर्चंसूक्तं।अतएवनवर्द्देशीशष्टानुदृत्तावनुक्रम्यते।इंद्रावरुणयोरिंद्रावरुणंयुवा
कुपादनिवृताविति।अत्रदेवताविस्पष्टा।ऋषिश्छंदसीसर्ववत् अनुवर्तेते।अयंतुविशेषः।युवाकुहीत्यादिके
द्वेऋचौपादनिचृन्नामकछंदस्के।विनियोगस्तुस्मार्तौलिंगिकावाकशिष्टवगांतव्यः।तस्मिन्सूक्तेप्रथ
मामृचमाह॥इंद्रावरुणयोरिति।अहमनुष्ठातासम्राजाः समीचीनराज्यापतयोः सम्यकुदीप्यमान
योर्वा।इंद्रावरुणयोर्देवयोः संबंधिअवोरक्षणंआवृणेसंवृतेःप्रार्थये।तावेतौदेवौ।ईदृशाएवंविधे
अस्मदीयस्वरेणनिमित्तभूतेसति।मृळातः।अस्मान्सुखयतः।इंद्रशब्दोरन्प्रत्ययांतः।वरुणशब्दउनन्प्र
त्ययांतः।उभौनित्वादाद्युदात्तौ।समासेदेवताद्वंद्वेचेतिपूर्वपदस्यानङादेशः।उभेयुगपदितिअनुवृत्तौदे
वताद्वंद्वेचेतियुगपदुभयपदप्रकृतिःस्वरत्वं।सम्राजोः।राजृदीप्तौ।सत्सूद्विषेत्यादिनाक्विप्।समोमो
नुस्वारेप्राप्तेमोराजिसमःक्वाविति मकारादेशः।तत्पुरुषेउत्तरपदप्रकृतिःस्वरत्वं।कर्तृकर्मणोःकृतीतिकर्त्त
रिषष्ठी।अवरक्षणादिषुअवतेःअसुन्।नित्वादाद्युदात्तः।आ।सुपांसुलुगित्यादिनाद्विवचनस्यडादेशः।टिलो
पः।वित्नकेरुदात्तनिवृत्तिःस्वरः।मृळातः।मृळसुखनेप्रार्थनायांलिङर्थेलेट्।इवत्बनंतस।लेटोडाटा १३७

विति॥ अजगमः। उदाद्भ्यः सः। ङि चात्र अपध गुणाभावः। ईदेशोन्त्यदादिषु देशोनालोपानौ कश्वतिङ्
दमृशाष्ट उपपदे देशः कञ्। उपपदसमासे इदं किमोरीः श्की इती दमईशः॥ शिचा सर्वादेशः। कञः किवाऽनु
णभावः। त्रिचा उत्तरपदस्याघ्रदात्तत्वं। उपपदसमासत्वात् उत्तरपदप्रकृतिः स्वरत्वेन तद्बाध्यते॥ गा
हितीयाम्रुवमाह॥ गंतारादीति। देईक्षावरूणो। अवासा। अवि उ, मउच्छातारं राहि तामावाला मद्विधस्य
विप्रस्य ब्राह्मणत्विंजोहवमाक्षानेगंतारोस्खो दिवास्त्रशी लोनवर्यारवह्नु कीदशो। वर्षणीनामनु ष्याणां
धर्त्तारो यागद्देमसंपादनेन धारयितारा। गंतारा। गामस्नास्थी लौ। रतन् दिववन स्सुपां सुलुगित्यादिना
आकारादेशः। हृदशो ङि गुणः। अच्छनि त्यादिनान्उपधा दीर्घत्वं। रनोनिचादाघ्रदात्तत्वं। स्कः असनुवि
लम्धमधुरूषू दिववनं। थसा। अदिप्र भृतिभ्यः। शपइति शपो लुक्। हिावनिति निघातः प्रतिषेधः। अवसो।
। अवरक्षणं। मेउर्यासास निच्यासनानिचादाघ्रदात्तः। हवांक्ष ओबक्रलंछंदसीति अनैमित्तिकासं नेन
प्रसारणपरपूर्वत्वे वक्त्रदोरवि यपु। गुणावादेशो अपः। पिचादनुदात्तत्वं। धातुः स्वरएव। विप्रस्य। उवप
बीजसंताना अस्यरूढौ। ईर्ड्यादिना निपातिता। निचादाघ्रदात्तः। मावतः। वउपो प्रकरणे छुष्म दस्मच्चों
छंदसिसातत श्यउपसंख्यानंवउपो। प्रत्यययोत्तरपदयोरस्मदो मपर्यंतस्य मादेशः। आसर्वनाम्नइतिदका

138

रस्यआकारः। सवर्णदीर्घः। मतुपः। पित्वादाद्युदात्तत्वं। प्रातिपदिकांतादात्तत्वे स एव शिष्यते। धनं नाशाद्धि
त्रक्षराणाण्वुलन्टनावितिन्टन्त्वाएकावत्तपादाशश्रतीट्प्रतिषेधः। गुणोरपरत्वं। अप्रनित्यादिनात्तपक्षा
दीर्घः। सुपां सुलुगित्याकारः। टवथित्वाददातादात्तत्वं। वर्षलीनां न्लूषे रादेशे ति अनिर्वृयः। तस्सं नियोगे
नककारस्य वकारः। प्रत्ययाद्युदात्तत्वं बाधित्वा छांदसमंतादात्तत्वं। अत एव नामन्यतस्या मितिविभक्ते
रुदात्तत्वं। अत्र दिमतुपियो रुत्खांतः। ततउत्तरस्य नाम्न उदात्तत्व मितिव्याख्यातं॥८॥ तृतीयामृवमाहा॥
अनुकाममिति। इंद्रावरुणा। हे इंद्रावरुणौ। अनुकामं। अस्मदीयाभिलाषमनुरायेन स्य प्रदानेन
आतर्पयेथां। सूर्वतान् स्मानटप्तानुऊरु। तंयत्तयदाधनं कामयामाहै। तदातदा प्रपच्छेतामित्यर्थः। ता
वां। ताहशो सुवानदिष्ठ अतिशयेन सामी प्यंयथा भवति तथा ईमाहे। कालविलंबमंतरेणधनं दत्त यानाम
व्यमित्यर्थः। सत्तदशा सुयाञाकर्मसुई माहृपठितं। अनुकामं। अनुरिहपश्चादार्थे अथवा सलक्ष ९६
णयथार्थे योगपतावीप्सापदार्थानतिवृत्तिः। सादृश्यंचेतिवचारोद्रियथार्था गृहीता। अव्ययं विभक्ति
रियादिना अव्ययीभावः समासः। अव्ययीभावश्चेत्यव्ययसंज्ञायां। अव्ययादाप्सुप इति प्राप्तस्य लुक
पवादोव्ययीभावादतानाल्बपंचम्या इति विभक्तेरमादेशः। समासस्येत्यंतोदात्तत्वं। तर्पयेथां। तृपप्रीणं १३८
ना हेशाटोलिवः। घित्वंतादात्तत्वं। आत्मनेपदं मध्यमद्विवचनमाथांटारआमेतइत्यामादेशः। आ
ध्वो॥१

=अनुकामस्य पश्चादनु कामं अथवा कामे ५

शपि स्यतो श्यय इत्याकारस्य ईयादेशः। आर्द्धधातुकाय लोपश्च। इंद्रावरुणा। सुपां सुलुगिति द्विवचनस्य
आकारः। आमंत्रिताद्युदात्तत्वं। संहितायामाकारस्य प्लुतत्वं। राय्यः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं।
सुपां सुलुगिति विभक्तेराकारः। पदात्परत्वाद्धवामि यस्य वा माद्देशानुदात्तः। न दिष्टं। अतिशयेनांतिकं
अतिशायिनः इष्ठन्। अंतिकबाढयोर्नेदसाधाविति नेदादेशः। यस्येति लोपः। इष्ठनो नित्वादाद्युदात्तत्वं। इम
हा ईगतौ। निपादात्मनेपदं। लङि लंङ्क्ष्वदसीति श्यनो लुक्। निघातः। बा चतुर्थी मंत्रमा... सुवाकूः इति। हि
यस्मात्कारणात् शची नाम स्मदीय कर्मणां संबंधि साम रूपं हविर्द्युवाकूः। वसती वार्यकिधनात्मकेरुद
के: पयसा चादिद्रव्यात्मेथिमिश्रितं। तथा सुमती नां शोभनबुद्धियुक्तानां मत्विजां स्तोत्ररूपं वचनमपि
सुवाकूः नानाविधैस्तु यद्गुणैर्मिश्रितं। तस्मात्कारणात् हे इंद्रावरुणौ तथाविधं हविः स्वीकृत्य तान्युक्ष्ये
प्रसादात्तव यं वाजदाद्यां। अत्र पदानां पुरुषाणां मध्ये मुख्या त्र्यायामेव मा। अप: अग्न इत्यादिषु षड्विंशति
संख्याकेषु कर्म नामसु शची शमी इति पठितं सुवाकूः। सुमिश्राणं। कठिकः षिण्याकारेचि त्रबाकूप
काद्योत्तरपदिकाकूः प्रत्ययः। किश्चेन गुणाभावः ऊकारस्यो वडादेशः। प्रत्ययस्वरेण मध्योदात्तत्वं। शची
शब्दः कृषांविन्मात शार्ङ्गरवादिङीनंता नित्वाद्याद्युदात्तः। इत्यमेवनस्य याद्दिषु गणपदिश्य न द्वात्रिं
तां कं। सुमतीनां। तिद्याम् सुमतीनामित्यत्रो क्तं। भूयाम्। प्रार्थनायां लिङ्। उत्तमः बहुवचनस्य इङ्

यासुट्परस्मैपदेषूदात्तो ङिच्चेत्युदात्तो यासुडागमः॥ लिङः सलोपोऽनंत्यस्येति सकारलोपः १

तइति सकारलोपः॥ बहुलंछंदसीति शपो लुक्। सति शिष्टस्वरबलीयस्त्वमुदात्त एव शिष्यते। वाजदाव्नां
वाजं ददातीति वाजदावानः। आतो मनिन्क्वनिब्वनिपश्चेति वनिप्। पित्वादनुदात्तः स्वर एव शिष्यते। समासस्य कृदुत्तर
पदप्रकृतिः स्वरत्वेन स एव शिष्यते। आमि अल्लोपोऽनः इत्यकारलोपः। तस्यापरस्मिन्निति स्थानिवद्भावा
१२९ ल्लोपाचोर्वर्जीति वकारलोपो न भवति॥ ८॥ पंचमीमृचमाह॥ इंद्रः सहस्रदाव्नामिति। अयमिंद्रः सह
५ सं स्रदाव्नां सहस्रं ख्याकं धनं प्रदातॄणां मध्ये कतमः धनदानस्य कर्ता भवति। प्रभूतं ददातीत्यर्थः। तथा वरुणः शंस्या
नां स्तुत्यानां मध्ये उक्थ्यः स्तुत्यो भवति। अतिशयेन स्तुत्य इत्यर्थः। वरुणः। उनन्प्रत्ययो नित्वादाद्युदात्तः।
कतमः। किमः कर्तरि इति कतमच्। चित्वादंतोदात्तः। उक्थ्यः। उक्थं शस्त्रं
नस्तुत्यत्वेन तत्र भव उक्थ्यः। भवेछंदसीति यत्। यस्येति लोपः। अत्र तित्स्वरितमित्येतद्वाधित्वा तीत्यायादि बा ६
त्वाद्यत्वादिवत्। घावुवाते यातां नावरति प्राप्नमाद्युदात्तत्वं। सर्वविधयः छंदसि विकल्प्यंत इति नाक्रियात।
४ य नञ्जो स्यति लोपास्त्वागवतिस्वतत्वम स्तु। नदि तदायतो नाव इति एतदस्ति। इत्युवाचाभावात्। अतएवच्छ्री
र्मायव स्तम्भायिवेत्यादौ स्वरितत्वं दृश्यते। नवपरचात्रियज्ञायस्येति लोपनत्रथमतो भाव्यमिति वाच्यं।
प्रकृतिः प्रत्ययाश्रयात् बहिरंगाध्यस्य तिलोपात् प्रत्ययमात्राश्रतया अंतरंगत्वेन तित्स्वरितमित्येतस्य १३९
प्राबल्यात्। अतऋमर्यायेत्यादिवत्। उक्थ्य इत्यत्रापि न लक्षणत एव स्वरितत्वं भविष्यतीति। किंछांदस्येपि नो
शस्यानो। शंसुस्तुतौ। शंसेलो ल्यंत तित्स्वरितमिति प्राप्ते ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तः। ८

घर द्वि। अपंतर

य।

त्रहिलोपमंतारालेव घ्यवचं तत्र यतोनाव इत्येन ह्रवति। तथा चेयं। ये इयमितिलापनि निबंधनघ्य त्रु। व
प्रादेशेषु तु स्वरितानेव भवितव्यमिति। एवं तर्हि तीर्ष्या यत्नोपाये ति। आदोयदाधक इात्र चैत दवष्छांदस
मस्तु। अथ त्रैष्टुभ वर्मलिंगं बलीयइत्येंतरंगत्वे पि स्वरितत्वं बाधित्वा लोप एकत्र विष्णुनीति। तत्पूर्वस्य कर्मायि सूर्यारि
यथादोव छांदस्यमस्तु। सर्वाप्येकत्र छांदसं स्यादित्युच्यते॥ इति प्रथमस्य प्रथमेत्रिं। शाकर्गः॥७॥
स्तुते सप्तमी सूक्तमाह॥ तयोरिदिति। नायारित सर्वेन्द्रियाणि इंद्रावरुणयोरव अवसेरु हृणेन वयमनुष्ठा
तारः। सानम। संभाजनमाधनमितिनिशाषः। निधीमहि। त्रा प्रासधनयाबद्रपेहि ति। तावन्नुचाततोर्थ वारि
प्तं धनं कविचित्रविधिरूपेण स्थापयामश्च। उतापि च प्रारवनं। सुकां त्रीहितान्। प्रकार्ष णाधिकं धनं स्या
पञ्चसुन नो संपद्यतां। अवसा। नित्याद्ाधकदातः। वयां। स्वयं हि वेत्थे यत्र यत्नु कृंत दत्त इहश्वां। मानमा। आशि बिलिङ्
तस्यमस्ति निच्यंङि तइतिसकारलोपः। अलोपय इति ईयादेशः। लोपा व्योर्वली तिय लोपः। लिङ्याशिष्यं
ङि यङ् आगुणः। पादादित्वान्न निघातः। धीमहि। डुधाञ् धारणपोषणयोः। आशि बिलिङ्ज महिङ्
तस्य छंदस्युभयथेति सार्वधातुकार्धधातुक संज्ञा तत्र सार्वधातुकत्वेन लिङः। सलोपानंत्यस्येति
सकारं कारं लोपः। सार्वधातुकमितिङिच्चाशब्द। बहुलं छंदसीति जुहोत्यादेरपि शपो लुक्। आद्धस

पिदि २

गाबो ३

उकवादातो लोप इति टिवेत्याकारलोपः। निघातः। सानामन्यापत्तया द्वितीयत्वादक्त्ववायोगे प्रथमेति नि
षेधः स्यात्। अस्तं प्रार्थनायां लिङ् इति प्रं इतश्चेतीकारलोपः। या स्तुट् परस्मैपदेषु उदात्तो ङिच्चेति यासुट् ङि
त्वे अदिप्रभृतिभ्यः। शप इति लुक्। अस्तोरल्लोपः। इ यकारलोपः। पादादित्वाद निघातः। उतो एवमादीनामेतत् इ
त्यंतोदात्तः। प्ररेथन्ने। रुविरविरस्वना। भावल्यकट्। योरनादेशः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। प्रादिसमासः।
रुडुत्तरपदप्रकृतिः स्वरत्वं॥ ऋा सप्तमीमृचमाह॥ इंद्रावरुणवामिति। इंद्रावरुणा। हे इंद्रावरुणौ। वां युवा
भ्यां। अहं हुवे आकयामि। किमर्थं चित्रायमणिमुक्तादिरूपेण विविधाय राधसे धनाय तत्तत् आह्वतो युवा
वां। अस्मान् सुम्राट् नस्सु जिग्युषः। शत्रुविषाय सुष्टु जयशीलान् कुरुतं। इंद्रावरुणा सुपां सुलुगित्या
दिना संबोधनस्य आकारः। देवताद्वंद्वे चेति सर्वपदस्यानङ्। आमंत्रितायुदात्तत्वं। संहितायां छांदसं रु
त्वं। क्वावाक्रयात् ह्वेञ् स्पर्द्धायामिकु वचनं मिप्। शप इत्यनुवृत्तौ बहुलं छंदसीति लुक्। कइत्यनुवृत्तौ बहुलं
छंदसीति संप्रसारणं। परपूर्वत्वं। अचि श्नुधातुभ्रुवां य्वोरियङुवङावित्यादिना उवङ्। न वशिक्रावारित्यादिना यणादेशः। हुवे इति एव
दि प्रतिपदोक्तस्य तत्र पुनरस्य लाक्षणिकत्वात्। इटः प्रत्ययस्वरेणोदात्तत्वं। पादादित्वान्न निघातः। राध
से। असुन् नित्वादाद्युदात्तत्वं। अस्मान्। शसि द्वितीयायां चेत्यात्वं। शसो नो इति नत्वं। जिग्युषः जिजाया १४०
लिटः क्वसुश्चेति क्वसु द्विर्वचनं। संलिटोर्जेः इति द्वितीयस्य कुत्वं। क्वसः। क्वि वाच्युणा भावः। कादिनिय

नं१ कुं४ कि

नियमेन वृत्तिः। द्वितीयाबहुवचनं शस् अन्नसंज्ञा वसोः संप्रसारणमिति [redacted] १

मः प्राप्तस्य शावस्येकाजुपाद्घसामिति संप्रसारणं परपूर्वत्वं च। परनेकाच इति यणादेशः। शासिवसिघसीनां चेति षत्वं। प्रत्ययस्य रणौ कारउदात्तः। ऊतं ऊम्न करणे। लोण्मध्यमद्विवचनस्य लस्य थावादेशः। शपो बहुलं छंदसीति लुक्। तिङ्ङतिङ इति निघातः॥७॥ अष्टमीमृचमाह॥ इंद्रावरुणा नू इति। इंद्रावरुणा हे इंद्राव रुणौ। धीषु स्मदीयबुद्धिषु वां युवां मिषा संतीषु। मनितं। संभक्तं। सम्यक्स्वे दित्रे इच्छती ष्णुतदानीमासमं तादस्मभ्यं शर्म सुखं च। नृत्रं। अतिशायन दिग्धं यच्छितं दत्तं। षड्विंशतिसंख्याकस्य दिग्घ नाम सुलुमद्धिगि पठितं। तस्य छिरा चत्रिं बलादतिशयो लभ्यते। इंद्रावरुणौ अक्तं। नूतं। त्रविन्नू घमकुत्तङ्। ऊत्रो रुध्याणा मिति पूर्वस्य दीर्घत्वं। आदेशप्रत्यययोरिति षत्वं। सनी वंतत्यादिना विकल्पादिडभावः। जनसनखनां सन् झलोरिति निकारस्य आकारः। उपरि लटः। शर्नं कर्तरि शप्। छगि तस्य तिङोपा शपसत्तो नियमितिनु म्। ङ ष्रुः शपश्चपि वाध्व उभ्वलसार्वधातुकं चेनवान्तुदात्तत्वं सनोनि वाताघृदात्तत्वं नादवाशिष्यते। धातु सावेकाव इतिविन्नके रुदात्तत्वं। अस्मभ्यं। अस्मभ्यमप्रतिस्कृतस्य यत्रोक्तं। यच्छतं। दाण्दाने। शपिपा घ्रेत्यादिना यच्छादेशः॥८॥ नवमीमृचमाह॥ प्रवामिति। इंद्रावरुणा हे इंद्रावरुणौ। यां। अस्मकर्तकी शोभनस्तुतिं प्रतिजावा। युवामुभावाक्ष्यामि। किंवा सधस्तुतिं। युवाया रुनयोः साहित्येन क्रियमाणा सिअस्तं स्तोवनब वासं नक्तौ। धा वादेः घसः। इच्छायां सन्। द्विर्वचनहलादिशेषः सन्यत इत्वं। ६

यास्तव क्रिया पाः स्तुकामायां सुष्टुतिं नमित लभ्या रुधमथे। स्तुवांवर्धार्थे। तादृशी सुष्टुतिः। शोभनस्तुतिदे
वभूतरुक्मसमूहो। वाममस्मात्तु। उवां व्या मोत्तु। अश्मोत। अश्ल व्यास्तो वोटा व्यत्ययेनतिप्। स्वादिभ्यः
श्नुः। सुष्टुतिः। न विंधां। अस्य सुष्टुतिमिन्यचो लक्षं। इन्द्रावरुणा। ऊवोतृके। अत्रतु यद्वृत्तयोगाद्अनि
घातः। रुधमथे। सुष्टुश्वशृष्मै। लट्। व्यत्ययेनात्मनेपदं। मधमदिववनेश्रो बळलंछंदसीति लुक्। अय ५
यः स्वारणआकारउदात्तः। यद्वृत्तयोगात्अनिघातः। सधस्तुनिर्यस्यां सुष्टुतौ सा सधस्तुतिः। अत्र सुष्टुति सधस्तुति
रित्यन्यपदार्थस्तुतिशब्दस्तूयते। अनयेति करणसाधनत्वेन रुक्यरचेत्रयं स्तुतिशब्दे भावसाधनतया स्तव
नक्रियापरः। तस्मिन्भावसाधनत्वं न क्रियापार। अयं करणसाधनतया रुकापुर इति भमस्यमान पदार्थादि
न्यः साहृत्यप्रत्ययकारस्य व्यत्ययेन धकारः। सधशब्द एवमादिचादं तोदात्तः। बहुव्रीहित्वेन पूर्वपदप्रकृतिः
स्वरत्वं। इति प्रथमस्य प्रथमे त्रयस्त्रिंशो वर्गः॥३३॥ ॥पंचमे नुवाके षट् सूक्तानि। तत्र सोमानमित प्रथमं
नवर्चं सूक्तं। सोमानमित्यादिकं नवर्चं सूक्तं। ऋषिछंदसी पूर्ववत्। देवता विशेषस्त्वेव मनुक्रम्यते। सोमान
मिति पंचब्राह्मणस्पत्याश्चतुर्थ्यामिंद्रश्च सोमश्च पंचम्यां दक्षिणा चान्याः सादसस्पत्या नाराशंसी वोत्ये १८१
ति। सूक्तगता आद्याः पंचार्चो ब्रह्मणस्पतिदेवताकाः। तासां मध्ये सद्भावीरइत्येकेस्येत स्याश्चतुर्थ्याश्चाव
रुावा

ब्रह्मणस्पतिरिंद्रश्च सोमश्चेति तिस्रो देवता। त्वं तमित्येतस्याः पंचम्या दक्षिणयासह वक्ता। तिस्रो
देवता। षष्ठीमारभ्य तिसृणां सदसस्पतिर्देवता। नाराशंसमित्येतस्या नवम्याः। सदसस्पतिर्नराशंसो
वा विकल्प्यते। विनियोगस्तु पूर्ववत्। अस्मिन्सूक्ते प्रथमामृचमाह।। सोमानमिति। हे ब्रह्मणस्पत एत
न्नामकादेव। सोमानमभिषवस्य कर्तारं मां अनुष्ठातारं स्वरणं देवेषु प्रकाशनवंतं कृणुहि। कुरु। अत्र दृ
ष्टांतः। कक्षीवंतं एतन्नामकमृषिं इव शास्त्राध्यारूढ्युः। कक्षीवान्यथा देवेषु प्रसिद्धस्तद्वदित्यर्थः।
यः कक्षीवानृषिः औशिजः। उशिजः पुत्रः। तमिवेति पूर्वीयाजनात्कक्षीवतोऽनुष्ठानस्य तु निष्प्रसिद्धि
स्तैत्तिरीयसाम्नायतो। एवं वेपरा आहुः। कक्षीवान् औशिजो वीतहव्यः श्रायसः त्रसदस्युः पौरुकुत्स्यः
प्रजाकामा अचिन्वतेति। ऋगंतरे पृच्छकथनेनानुष्ठातृत्वप्रसिद्धिः स्यात्। अहं कक्षीवान् ऋषिरस्मि
विप्र इति। तस्मादस्यानुष्ठातारं प्रतिदृष्टांतत्वं युक्तं। सोयं मंत्रो यास्केन एवं व्याख्यातः।। सोमानं सोतारं प्र
काशनवंतं कुरु ब्रह्मणस्पते कक्षीवंतमिव य औशिजः। कक्षीवान् कक्ष्यावान्। औशिजः। उशिजः पुत्र
उशिग्वष्टेः कांतिकर्मणोऽपि त्वयं मनुष्यकक्षा एवाभिप्रेतं स्यात्। सोमानं सोतारं मा प्रकाशनवंतं कुरु ब्र
ह्मणस्पत इति। अस्मिन्मंत्रे सोमानमिति पादे ब्रह्मण इति पादेन वस्तुं संविहितं तात्पर्यं तैत्तिरीया आम

नंति। सोमानं स्वरणमित्यादौ सोमपीथाम वहौ वरूंधि। हृणुहि ब्रह्मणस्पति इत्यादौ ब्रह्मवर्चसमेवा
वरुंध इति। सोमानं। सुनोतीति। षुञ् अभिषवे। अन्येभ्योपि दृश्यत इति मनिन्। दृशिग्रहणस्य विध्यंतरो
पसंग्रहणार्थत्वान्निस्वेपि नाघकृदातत्वं। किंतु प्रत्ययस्वर एव। तं छांदसत्वादिषु वा सामान्य शब्दो द्रष्टव्यः। बहुल
162 ग्रहणाद्दोणादिको वा मन्निर्दिष्टव्यः। स्वरणं। प्रकाशयितारं। स्वृ शब्दोपतापयोः। कृत्यल्युटो बहुलमिति क
र्तरि ल्युट्। लितीत्याकार उदात्तः। कृणुहि। कृवि हिंसाकरणयोश्च। इदितो नुम् धातोरिति नुम्। लोटः। शि
पो हि। शिपि प्राप्ते धिन्विकृण्व्योरच्चेत्युप्रत्ययः। तत्संनियोगेन वकारस्याकारः। तस्यातो लोप इति लो
पः। तस्य स्थानिवद्भावान्न सर्वस्य लघूपधगुणः। हित्वादकारस्य न गुणः। उतश्च प्रत्ययाच्छंदो वा वचनमि
ति हेर्न लुक्। सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनात् विकरणप्रत्ययस्वरेणोदात्तत्वं।
पादादित्वान्न निघातः। ब्रह्मणः। षष्ठ्याः पति पुत्रेत्यादिना संहितायां विसर्जनीयस्य सकारः। सुबामंत्रि
ते पराङ्गवद्भावात् पदद्वयस्य आमंत्रितनिघातः। कक्षीवंतं। कक्ष्ये भवा कक्ष्या। अश्वोदर संबंधिनी रज्जुः।
ता। बहुलं छंदसीति यः प्रत्ययः। सात्र अस्यास्तीत्यर्थे आसंदीवदष्ठीवच्चक्रीवदिति। ऋषिविशेषनाम। कक्षी
वच्छब्दो निपातितः। छंदसीर इति वत्वं। प्रत्ययस्वरेणांतोदात्तत्वं निपातितः। ईकार उदात्तः। मतुपो १४२
सु

पिचादनुदात्तो॥ अशिङः। वशाकां।त्तो।इजीयनुवर्त्तते। वशात्तिङिजिप्रत्ययः। तस्य किद्वाङ्दिङ्क्ष्यादि
नासंप्रसारणं। परसवर्णे गुणाभावः। सतस्यापत्यमिति शाब्दी व्याप्ति। ण आदिवृद्धिः प्रत्ययस्य रणो तोपात्तवं
द्वितीयाम्द्रसमासः। यारवानिति तो योव्रुह्नणस्पतिः॥ रवान् धनवान्। यथा मीवहारोगाणां दंता। वसु
विद्धधनस्य लक्ष्मा पुष्टिवर्द्धनः पुष्टिवर्द्धयिता। यथचरस्य रोपितः शीघ्रफलदः सब्रह्मणस्पतिः।
नोऽस्मान्सिसक्तु एव तां परिगृह्णातु गृह्णातु वित्यर्थः। अत्र सिसक्तुशब्दस्यासनार्थ चेयास्क आह।
सिसक्तु सर्वं इति सिचमानस्येति। पर्यायः शब्दाविति शेषः। रवान्। रयिरस्यास्तीति मतुप्। रायमतौ
बहुलमिति यकारस्य संप्रसारणं। परसवर्णे चं दसीर इति वचनं। आद्गुणः। ननु वस्यासो सिद्धत्वात् व
हिरंगत्वाच्च प्रागेव गुणे कृते इवर्णाभावान्नु वचनं वांतादिवाश्चयादिवद्भावेन इवर्णसंपादनं व
र्णाश्रयविधौ तत्प्रतिषेधात्। अन्यथा षड्विरिति यत्र सवर्णदीर्घस्यांतवद्भावेन अकारवादतान्नि
साएसिञ्चे सादेशस्यात्। न च निरवकाशत्वे न वचनस्यानवकाशत्वं। आग्निवात्। वेदनं स्त्रिये:। उपब्रह्मा
णि हरिवश्यादि अवकाशलाभात्। सत्यं। अत्र गुणप्रवृत्तिः प्रागिकारात् परो मतुप्। कदाचिदिसत्परस्य

मतुपः पश्चादेकारादाशन इवर्णाभावेपि भवति वत्वमिति छंदसीर इति सूत्रे कृता विवक्षितं मु
निवाग्निप्रायेण हरिवइत्यादिकं उदाहृत्यापि अंत उदात्तत्वं कृता आ रवानित्यप्युदाहृतं । हस्वनु
ड्भ्यां मितुप्नित्यत्र । आर शब्दान्मतुप इत्युदात्तत्वं । वक्तव्यमित्यत्र आरशब्दोरशब्दस्यापि उपलक्षणं । अ
नएव द्दारवां इन्द्रियादौ मतुप उदात्तत्वं दृष्टं । अथवा हस्वनुड्भ्यां मिति । अत्राधिक दाविक्ष्यात्पर
स्य मतुप उदात्तत्वमित्येव व्याख्येयं । एवं वसंप्रसारणं परपूर्वत्वयोः कृतायां गुणे आक् हस्वात्परो म
तुबिति रवनारवानित्यादौ सर्वत्रोदात्तत्वं सिध्यति । अयामवन्मूत्र कृतोभिप्रायो वार्तिककृता व्या
ख्यातः इति । अमीवहा । अमीरोगः इत्येतस्मादुन प्रत्ययेन अमीवशब्दो निपातितः । तंहतीति बहुलं
छंदसीति क्विप् । उत्तरपदप्रकृतिः स्वरत्वं । वसुवित् । वसु विंदतीति वसुवित् । क्विप् । प्रतिक्विप् । उत्त
रपदप्रकृतिः स्वरत्वं । पुष्टिवर्द्धनः । प्रवर्द्धयतेर्नंद्यादित्वाल्ल्युः । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । पु
ष्टिवर्द्धन इति कर्मणि षष्ठ्यासमासः । कृदुत्तरपदप्रकृतिः स्वरत्वं । सिषक्तु । षच समवाये । लाटि
बहुलं छंदसीति शपः श्लुः । श्लाविति द्विर्वचने कृते उत्तरपदप्रकृतिः स्वरत्वं । लादेशः । बहुलं छं १४३

छंदसीति आन्यासा॑ कारस्य इकारः। वरच्चराण। इगुपधज्ञाप्रीकिरः कः प्रत्ययः स्वरः॥ ८॥ इती
याम्रुवमाह॥ मानः शंस इति। अररुषो मर्त्यस्य उपद्रवं कर्तुं अस्य समीपं प्राप्तस्य शत्रुरूपस्य
मनुष्यस्य धूर्तिः हिंसकः शंसः शंसनमभिप्राय इत्यर्थः। तादृशो वा त्रिशाषाना अस्मान् मा प्रण
क् मा संपृणक्तु। शत्रुणां प्रयुक्तो निक्षेपः कवादिदस्मान्मां प्राप्नोचित्यर्थः। तदर्थं हे ब्रह्मणस्प
५ रांरा: ते। नो अस्मान् पालय। मा निपातं शंसनं मन्त्रा विघ्नन्। नि यादा घदान्तः। अररुषः। अरातिरु
रियंतर्नाविन्यथाति रगताविज्ञस्मात् अरू सउणोरपरत्वं। प्रत्ययस्वारप्राप्ते वृषादिवादाघ
७ धूर्तिः दात्तः। धूर्तिः। धुर्वि हिंसा। क्तिन्। क्तो वसंज्ञायामिति। क्तिन्। तितुत्रतथसिसुसरकसेषु चेतीट्प्रति
षेधः। उपधायाश्चेत्युपधादीर्घत्वं। बलिलोपं बाधित्वा ऊठि प्राप्ते राल्लोप इति वकारलोपः।
३ वी प्रणक्। पृची संपर्के। लङ् सिप्। इतश्चेतीकारलोपः। हल्ङ्यादिलोपः। ऊचं। रुधादिभ्यः श्न
मातस्य व्यत्ययो बहुलमिति अडागमः। यणादेशः। अकारस्य आगमानुशासनत्वं बाधित्वा
व्यत्ययेन उदात्तत्वं। वादिलोपविभाषेति निघ्नाताभावः। मर्त्यस्यामृड्प्राणत्यागे। असिहसिमृ इ

त्या१

यादिना। अणादिकस्तन्प्रत्ययः। मर्त्येषु नवस्य। र्थे। भव छंदसीति यत्। यतो नाव इत्युदात्त
त्वं। रक्ष। रक्षपालने। शपः पित्वादनुदात्तत्वं। धातुस्वर एव। शिष्यते। पादादित्वान्निघातः। रक्षाणः।
घ्यचोत। स्तिङ इति दीर्घः। उपसर्गाद्बहुलमिति ग्रहणात् अनुपसर्गादपि नसा णत्वं। ब्रह्मणस्पते। ष
ष्ठ्याः पतिपुत्रेति संहितायां विसर्गस्य सकारः। सुबामंत्रिते पराङ्गवत्स्वरे वा तद्वद्यस्यामंत्रितनिघा
तः॥८॥ चतुर्थीमृचमाह॥ स घा वीर इति॥ इंद्र। दावा यं मर्त्यं यद्गमालं हिनाति प्राप्नोति। वर्द्धयति वा॥
तथा ब्रह्मणस्पतिर्देवो हिनोति। तथा सोमो हिनोति। स घ स एव यजमानः वीरो वीर्ययुक्तः सन् न
रिष्यति न विनश्यति। घ वादिरनुदात्तः। संहितायां तु विनुम्बुघमक्षुतङ्कुत्रोरुष्याणामिति दीर्घः।
ब्रह्मणस्पतिरुक्तं। हिनोति। हि गतौ वृद्धौ च। स्वादिभ्यः श्नुः। तिपः पित्वात् श्नुप्रत्ययः स्वर एव शिष्य
ते॥८॥ पंचमीमृचमाह॥ त्वं तं ब्रह्मणस्पते इति॥ हे ब्रह्मणस्पते। त्वं तं मर्त्यं अनुष्ठातारं मनुष्यं अंहसः।
पापात् पाहीति शेषः। तथा सोमः पातु। इंद्रश्च पातु। दक्षिणा च रक्षतु। देवता वा पातु। दक्षिणा। दक्षस्य वृद्धि
हेतुः दक्षिणयामिनन्। निद्वादाद्युदात्तः। अंहसः। नब्विषयस्येत्यादिना आद्युदात्तः॥ इति प्रथमस्य प्रथ १८४

ण बृहत्त्रिंशो वर्गः ॥६॥ अनुप्रवचनीयस्य वाराद्धौमे सदसस्पतिमित्येषा विनियुक्ता। तथाच गृह्ये मेख
लाबंध इति खंडे सूत्रितं पठ्यते। आचार्यः समन्वारब्धो जुहुयात् सदसस्पतिमद्भुतमिति। तामेतां सूक्ते ष
ष्ठीमृचमाह॥ सदसस्पतिमिति॥ मेधां नामकं सदसस्पतिं एतन्नामकं देवं अयासिषं। प्राप्तवानस्मि। कीदृशं।
अद्भुतमाश्चर्यकरं। इंद्रस्य प्रियं। सोमपानसहवासित्वात् काम्यं। कमनीयं। सनिं। धनस्य दातारं। सदसः।
षद्लृ विशरणादौ सर्वधातुभ्योऽसुन्॥ नित्वादाद्युदात्तः। पतिं। पातेर्डतिः। टिलोपः। प्रत्ययस्वरः। प्रियं। इ
गुपधज्ञाप्रीकिरः कः। इयङादेशः प्रत्ययस्वरः। काम्यं। कामयतेः ण्यत्। णेरनिटीति णिलोपः। यतो
नाव इत्याद्युदात्तत्वं। सनिं। षणु दाने। धात्वादेः षः सः। अच इः इत्यनुवृत्तौ खनिकषिकष्यज्यसिवशिध्वनिसन्
निध्वनिसनिग्रंथि चरिभ्यश्चेति इप्रत्ययः। प्रत्ययस्वरः। अयासिषं। या प्रापणे। लुङ् मिपोऽमादेशः।
यमरमनमातां सक्चेति सिच्। इडागमः। धातोः सगागमो निघातः॥७॥ सप्तमीमृचमाह॥ यस्मादृते न
ति। यज्ञो यमनुष्ठातव्यो। विपश्चितश्चन विदुषोपि यजमानस्य यस्मात् सदसस्पतिदेवादृते न सिध्य
ति। सोऽयं सदसस्पतिर्धीनां धीनां मनोनुष्ठानविषयाणां अस्मद्बुद्धीनां अनुष्ठेयकर्मणां वा योगं संबं
धं इन्वति व्याप्नोति। यजमानमनुगृह्णन् तदीयं यज्ञं निष्पादयतीत्यर्थः। यस्मात् अन्यारादितरादिनाऋ

त्तयोगात् पंचमी सावेकाच इति विभक्तेरुदात्तत्वे प्राप्ते न गोश्वं सावववर्णेति प्रतिषेधः। सिध्यतिरि
डुसंराद्धो। शेयेनो निच्चादाद्युदात्तत्वं। यद्वृत्तान्नित्यमिति निघातः प्रतिषेधः। धीनां। सावेकाच्च विभक्ते
रुदात्तत्वं। योगं। युजिर् योगे। घञो ञित्वादाद्युदात्तत्वं। इन्वति। इन्वि व्याप्तौ शपङ्दित्वात् मेन्वेधानो
रितिनुम्। निघातः। अष्टमीमृचमाह। आदृघ्नोतीति। आत् अनंतरमेव। हविष्कृतिं हविः संपा
145 दनकृतं। यजमानं ऋध्नोति। सदसस्पतिर्देवो वर्द्धयति। हविर्दानानंतरमेव। फलं प्रयच्छतीत्यर्थः
तथाविधं सिद्धाय अध्वरं यजमाने (आदृघ्नोति) नान्नुष्ठीयमाने यज्ञं प्रांचं प्रकर्षेण गच्छंतं अविघ्ने
न परिसमाप्तियुक्तं कृणोति। करोति। होत्रा ह्वयमाना देवताः दृष्टा सती यजमानं प्रख्यापयित्वा द
विष्णु गच्छति। यद्वास्मदीयस्तुतिरूपा वाक् देवान् परितो प्रापयित्वा देवेषु गच्छति। श्लोकधाराद्या
दिषु सप्तपं वा शस्त्रवाक्षाम स्तुतो त्रागीरिति पठितं। हविष्कृतिं। हविषः कृतिं संपादनं यस्य यज
व मानस्य सोयं हविः कृतिः। बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृति। स्वरत्वं। प्रांचं। अनिगंताञ्चः। ति
प्रत्यय इति गतिप्रकृतिः स्वरत्वं। पश्चादेकादेशः स्वरः। अध्वरं। न विद्यते ध्वारा हिंसा यस्मिन्नयं नञ् सुभ्या
मित्युत्तरपदान्तोदात्तत्वं। होत्रा। कृयात अस्यामिति होत्रा देवता सुख्या मा क्रमणश्रितिन्व त्वन्दि तित्रे १४५

त्रन्।निवादाधकृदासः॥७॥ नवमीमृचमाह॥ नराशंसमिति॥ नराशंसं एतन्नामकं देवविशेषं
यद्यात्रवयवार्थव्युत्पत्त्या सदसस्पतिर्देवतापर्यायशब्दः। व्युत्पत्तिं वयास्काद्दर्शयति। नराशं
सोयज्ञ इति कात्थक्यो नराः। अस्मिन्नासीनाः शंसंति अग्निरिति शाकपूणिः। नरैः प्रशस्यो भवती
ति। अत्राग्निवत्सदसस्पतेरपि नरैः शस्यमानत्वान्नाराशंसत्वं। एतामेवाभिप्रायं हृदि निधाय ब्रा
ह्मणमेवमाम्नायाता प्रजा वै नरो वाक् शंस इति। अतो मनुष्यैः शस्यमानो यः सदसस्पतिः सो
४ वा नराशंसनामको देवस्तमपश्यं शास्त्रदृष्ट्या दृष्टवानस्मि। कीदृशं सुधृष्टमं। अत्याधिक्ये न धृ
ष्टं युक्तं। सप्रथस्तमं अतिशयेन प्रख्यातं। सद्मम खसं प्राप्तनातेजस्कं। तत्र दृष्टांतः। दिवो न।
द्युलोकमिव। आदित्यचंद्रादिभिरधिष्ठिता द्युलोकविशेषा यथा तेजस्विनः। तद्वदयं नाराशंसस्ते
जस्वीत्यर्थः। शोभनं धृष्णोतीति सुधृष्ट। ञिधृषेति धि प्र। अतिशायिनि कस्तमप्रत्ययः कारस्य जस्त्वा
भावः छांदसः। हृदुत्तरपदप्रकृतिः स्वरत्वे नञकारस्तु उदात्तः। अपश्यं। प्राघ्राध्मेत्यादिना पश्या
देशः। लुङ् लङ् लृङ् क्ष्वडुदात्तः इत्यडागमस्तत्वं। पादादित्वाद् निघातः। सप्रथस्तमं। प्रथ प्रख्याने।
प्रथमं प्रथः। सर्वधातुभ्योऽसुन्। निवादाधकृदासत्वं। सह प्रथसा वर्तत इति तेन सहेति तुल्ययोगे
नो१

गइति बहुव्रीहिस मासः। वा पर्जन्य स्येति सादेशः। सर्व पद प्रकृतिः स्वरश्च प्राप्ते परादिश्छंदसब
हुलमिति उत्तर पदाद्युदात्तत्वं। दिवः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। सप्तमरवसं। सीदतीति
सप्ता प्रकृतिविशेषणादेव अन्येभ्योपि दृश्यत इति मनिन् निवादाद्युदात्तः। सप्त महोयं यस्येति बहु
146 व्रीहिः। हकारस्य यच्छ्येनरवकारः॥ इति प्रथमस्य प्रथमे पंच त्रिंशो वर्गः॥ ॥ प्रतित्यमिति नववं
द्वितीय सूक्तं। ऋषिश्छंदसी पूर्ववत्। देवता त्वनुक्रम्यते। प्रतित्यमाग्निमारुतमिति। कारीरष्टौ। प्रति
त्यमित्युपाधमा स्या। तथाव सूत्रितं। वर्षकामा इष्टिः। कारीरी। तस्यां प्रति त्यं वा रुमध्वरमीले अग्नि
च्चित्र सं नामा निच्य मिच्ये पाधमस्या तथाव सूत्रितं। वर्षकामा इष्टिः। कारीरी। तस्यां प्रति यं वा रुमिति
त्यमध्ये सर्वनामान च्छद्रपर्यायः। हे अग्ने। यो यज्ञः। वारुंगं वे कल्पुरहितः। त्यं। तथा विधं। वामध्वरं प्र
ति नैल भ्य। गापीथाय सोमपानाय प्रहूयसे। प्रकर्षेणाह्वयसे। तस्माद्स्मि न्मध्वरौ त्वं मरुद्भि
र्महादेव विशिष्टैः सह आगहि। आगच्छ। सेयमृक् यास्केन एवं व्याख्याता। तं प्रति वारुमध्व
रं सोमपानायप्रहूयसे। सोग्ने मरुद्भिः सह आगच्छ ति। प्रति निपात आद्युदात्तः। त्यं। यदा १४६
दीनामः प्रातिपदिकः स्वरः। वारुं। हृसानि ऊनिचरीयादिना प्लुणा। अनतउपधायाइति वृद्धिः। नि

देवःघवाघकंताश्च चादंतोदात्तः।५

चादा घकदात्तः।गोपीथाय।निशीथगोपीथावसथ इतियकौ प्रत्ययांतो निपातितः। प्रातिनिपात
स्वरः।।छा।द्विती यामृचमाह।।न हिदेव इति।।हे अग्ने।महो।मरुतः।ते तव संबंधि कं तं कम विशेष मु
द्भं ध्यपरोन हि।।उ रुः।त्वो नैन भवति।खलु तथा मूर्त्यो मनुष्यश्च पारान भवति।येमनुष्याः त्वदीयं कं त
मनु तिष्ठंति।।यचादेवा त्वदीय क्रतोः इत्यात।एतेवो ऽष्टाइत्यर्थः।मरुद्भिरित्यादिस्त्वर्ववन।।न हि।एव
मादीनामंत श्यांतादात्तः।मरुः।मरुतः।लोप छांदसः।वृहन्मरुतोरूप संख्या नमितिविभक्त्यरु दा
त्तत्वांतवा युष्मदस्मदोः ङसीया घ दात्तत्वं।कंउं।रुग्नः।कंउः।प्रत्ययाघुदात्तत्वं।गहि।गमृसृष्टग
तो।लोटः।मर्हि।बहुलं छंदसीति शपालुक्।अनुदात्तोपदेशेत्यादिना अनुनासिकालापः।त
स्यासिद्धवदत्राभादित्यसिद्धवा दाताहरिति धुकू न भव ति।निघातः।।छा।तृतीयामृचमाह।।ये
महइति।हे अग्नेयमरुतो महोरजसोमरुद्वं उदकस्य वर्षणप्रकारं विद्वुः।।तेर्मरुद्भिरित्यन्वयः
कीदृशामरुतः।विश्वेसार्व सप्त विध गाणापताः।सप्तगणावेमरुतो इतिश्रुतः।।देवासुः।द्योतमा
नः।अद्रुहः।द्रोहरहिताः।वर्षणेन सर्वभूतोपकारित्वात्।तथाचोपरिष्टातौ आम्नासित।तुदी यर
रयथामरुतः समुद्रतास्यंवृष्टिंवर्षयथा पुरीषिणः।इतिशाखांतरेपि मंत्रांतरस्य ब्राह्मणमव

माम्नायात। मरुतां पृषत्यः स्युरित्याद्व॥ मरुतो विश्वकृष्टयः ईशात इति। रजः इति शब्दस्य। स्कन्नबकु
धव्याख्यातः। रजो रजतेर्ज्योती रजौ उच्यते। उदकं रज उच्यते। लोका रजांस्युच्यंते असृगहनी रजसी
उच्येते इति। रजसः। नञ्विषयस्यानिष्टं तस्यान्तोदात्तः। विदुः। विद ज्ञाने। विदो लटो वेति झेरुसादेशः
प्रत्ययस्वरः। यद्वृत्तयोगान्निघाताभावः। विश्वा। विशः [illegible]त्रं तस्य। निपातादाद्युदात्तत्वं। देवासः। आज्जसे
रसुक्। देवशब्दः पचाद्यजंतः। विश्वादंतोदात्तत्वं। अद्रुहः। संपदादित्वात् क्विपि बहुव्रीहौ। नञ्सुभ्यामित्यं
तोदात्तत्वं। कर्तरि वा क्विप्। तत्पुरुषे हि अव्ययपूर्वपदप्रकृतिस्वरत्वं स्यात्। न बहुव्रीहौ उत्तरपदप्रकृतिः स्वर
त्वं। यातानन्तनगतिर्निर्विकार इति॥ ८॥ यत्तूर्यमृत्व मारुत। यत्ता इति। यमरुतः। उग्रास्तीव्राः संतः अर्कमुद
कं। आनृचुः। अर्चितवंतः। वर्षणेन संपादितवंत इत्यर्थः। ते मरुद्भिरित्यन्वयः। कीदृशा मरुतः। उग्रसा
बलेन अनाधृष्टासः। अतिरस्कृताः। सर्वेभ्यः प्रबला इत्यर्थः। अर्कशब्दस्योदकवाचित्वं वाजसनेयिनः
आमनंति। आपो वा अर्क इति। तन्निर्वचनं च। तद्वेवामनंति। सोऽर्चन्नचरत्तस्यार्चत आपोऽजायंत। इति तावे
मिकमभूदिति तद्वा अर्कस्यार्कत्वमिति सर्जगसृष्ट्वा। हिरण्यगर्भसुदकं सस्रुज सृष्टवान्। अर्थ उदकम्।
स यं संकल्पं हि मम प्रत्याख्यानन्। स्वात्मानं सृजयत्नवरन्। तथा सृजयात हिरण्यगर्भस्य सकाशात् १४७
उदकमुत्पन्नं तदानीमर्चता मन्त्रः कमभूदिति वा वचनेनोदकस्यार्क नाम निष्पन्नमित्यर्थः। आनृचुः।

वमर ५३

अर्वातपरस्याधथामित्यादिना निपातः प्रत्ययः स्वरः। यद्वृत्तयोगान्न निघातः। अनाधृष्टास्सः। अ
व्ययपूर्वपदप्रकृतिः स्वरत्वं। उज्जसा। उज्जीवा सर्वलोपश्चेयस्तुन्। निघादाघ्फदान्तः। ७। पंचमीमृ
चमाह। येशुश्नाः इति। यमं मरुतः शुत्रवादिगुणोपेताः तैर्मरुद्भिरिति अन्वयः। शुभ्राः शोभनाः।
घोरवर्पसः उग्ररूपधराः। सुदृत्रासः। शोभनधनोपेताः। रिशादसः। हिंसकानां खादकाः। मघामित्या
दिषु षष्ठाविंशतिसंख्याकेषु धननामसु दत्रं भगइ निपठितं। सुदन्त्रस्फा। यितं वीत्यादिना सुत्रेरोणा
दिकारकः। प्रत्ययः स्वरः। घोरवर्पसः। घोरं वा पीयषां। बहुव्रीहौ पूर्वपदप्रकृतिः स्वरत्वं। सुदृ
त्रासः। बहुव्रीहौ। नञ्सुभ्यामिच्छन्तरपदान्तोदात्तत्वं। आघ्फदान्तः। छंदसी ये वञ्जन भवति। दृ
त्रशब्दस्यांतोदात्त्वात्। ८। रिशादसः। रिशंति हिंसंतीति रिशास्तान् दंतीति रिशादसः। सर्वधातुभ्योऽसु
न् प्रत्ययः। निःस्वारणउत्तरपदमाघ्फदान्तो दुत्तरपदप्रकृतिः स्वारण स एव शिष्यते। ७। इति प्रथमस्य
प्रथमाष्टके शोवर्गः। ७। सत्ते षष्ठी मृचमाह। यनाकस्येति। यमरुतो नाकस्याधि दुःखरहितस्य स्वर्गस्य पृ
२ दिवि रिं घृलोकेरोचने दीप्यमाने पादिवा सः स्वयमपि दीप्यमानं आसते। तैर्मरुद्भिरिन्द्र यः। नाकस्य। कंसुखं त
द्यास्मिन्नास्तीति असावकइति बहुव्रीहिं ह्रस्वापश्चान्नञ्नन्। अकोनाकइति नञ्तत्पुरुषः। नालापानजू

इति लोपो न भवति। नभ्राण्नपादित्यादिना प्रकृतिभावात् तस्य कृत्रे उल्यार्थे इत्यादिना अव्ययपूर्वपद
प्रकृतिःस्वरश्चेनञुदात्तत्वं प्रथमतस्य त्रुरूपं तत्वापश्चाद्ध कृत्री।हो। नञ्नरपदं तादात्तत्वं स्यात्। अ
क्षिशब्दस्तृपर्यायस्तिउपसर्गप्रतिरूपकोनिपातः। बोसावते। रुवदीत्तो। अनुदात्तेत श्च हलादेरिति। सु
वा। वितर्ड्यं तादात्तत्वं। दिविकडिदमित्यादिना विनक्ते रुदात्तत्वं। दिवासः। आङ्क्षसरस्तुगिति अस्तु कु
आसता। आसत उपवेशने। अनुदात्तेत्वादात्मनेपदं। कृस्य अदादेशः। अदिप्रभृतिभ्य इति शपो लुक्।
148 कृ। अनुदात्तेचाद्यसार्वधातुकौ नुदात्तत्वं। यद्वृत्तयोगान्ननिघातः॥ ७॥ सप्तमी मृचमाह॥ प्रेईखयंतीति।
यमरुतः पर्वतान् मेघान्। ईखयंति। चालयंति। तथा अर्णवं। उदकयुक्तं समुद्रं नि स्कुर्वंती तिशाषः॥ नि
श्चलजलस्य तरंगाधकत्वे नायचालनं तिरस्कारः॥ तेर्मरुद्भिरिच्यव यः। ईखयंति। खण रवेत्या दावी
र्विर्गर्द्व्यर्थः॥ रुदुमि निवर्तितेति। इदितानुम्धातोरिति नुम्। लिजंतधातोश्छित इयंता रात्तत्वं। शपः
पिचादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वर एव शिष्येत। पर्वतान्। भर्व पर्व मर्व पूरणे। उणादिकान्
तः प्रत्ययः स्वरः॥ ८॥ अष्टमीमृचमाह॥ आयन्नथंतीति। यमरुतो रश्मिभिः सूर्यकिरणैः सह आत १४८
न्वंति। आप्नुवंति। आकारमेशमिति शाषः॥ किंवा उज्जसा स्वकीयबलेन समुद्रं तिरस्कुर्वंति। तेर्मरु

ज्रिश्चिन्द्वयः। तन्वंति। तनु विस्तारे। लोटोऽक्तो तः। तनादिकृञ्भ्य उः सतिशिष्टः स्वरो बलीयस्त्वमन्यत्र विकरणेभ्य इति तिङ एवाद्युदात्तत्वं॥७॥ नवमीमृचमाह॥ अग्ने त्वमिति। हे अग्ने पूर्वपीतये। पूर्वकाल प्रवृत्ताय पानाय त्वां प्रति सोम्यं मधु। सोमसंबंधिनं मधुरसं सृजामि। सर्वतः संपादयामि। अतस्त्वं मरुद्भिः सहागच्छ। अग्निमेवमादीनां मंतद्रष्टॄ त्वादानः। चामो द्वितीया या इति चादेशः। सर्वानुदात्तः। पूर्वपीतये। पूर्वा चासौ पीतिश्च पूर्व कर्मधारये दिक्सांख्ये इत्यादिना पूर्वपदप्रकृतिस्वरः। सृजामि सृज विसर्गे। शपः पित्वादनुदात्तत्वं। विकरणस्वरः। सोम्यं। सोममर्हतीति यः। प्रत्ययस्वरेणांतोदात्तः। मधु फलि पाटि नमी इत्यादिना उ प्रत्ययः। निदित्युवृत्तेराद्युदात्तत्वं। अन्यत्॥९॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके प्रथमो०

॥ॐ॥ ॥ॐ॥ श्री गुरुवे नमः॥ यस्य निश्वसितं वेदा यो वेदेभ्यो[illegible] जगत्॥ निर्ममे तमहं वंदे विद्य
ातीर्थमहेश्वरं॥ प्रथमाष्टके द्वितीयाध्याये आरभ्यते [illegible] यं देवायेच एवं रतीयंस्त
चौ॥ तस्य ऋषिच्छंदसी सर्ववत्॥ क्रतु देवता

प्रो फे ५९

३०००

१४१२